1016

THE KUPPUSWAMI SASTRI
RESEARCH INSTITUTE,
MADRAS.

A DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS

IN THE

GOVERNMENT ORIENTAL MANUSCRIPTS
LIBRARY, MADRAS

BY

M. RANGACHARYA, M.A., RAO BAHADUR,

PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE;
AND CURATOR, GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS

Prepared under the orders of the Government of Madras.

VOL. XVIII—STŌTRAS.—(*cont*)

2 Praśaṁsā—Stōtras

MADRAS

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS

1915.

CONTENTS.

CLASS IX—STŌTRAS—*cont.*

2. PRAŚAMSĀSTŌTRAS

(1) *Āñjanēya.*

(2) *Umāmahēśvara.*

(3) *Gaṅgā.*

(4) *Garuḍa.*

(5) *Gaṇapati.*

(6) *Gāyatrī.*

(7) *Jina.*

(7) *Jina*—contd.

(8) *Nadī*

(9) *Navagraha*

(10) *Parabrahman*

(10) *Parabrahman*—contd.

(11) *Nandi and Basava*

(12) *Pārvati*

(12) *Pārvatī*—contd.

(13) *Bilva.*

(14) *Bṛhaspati*

(15) *Bhūmi.*

(16) *Yama.*

(17) *Rāmānuja.*

(18) *Lakṣmī.*

(18) *Lakṣmī*—contd.

(19) *Vallabhācārya.*

(20) *Vāyu or the God of Wind.*

(21) *Viṣṇu.*

(21) *Viṣṇu*—contd.

(21) *Viṣṇu*—contd.

(21) *Visnu*—contd.

(21) *Visnu*—contd.

(21) *Visnu*—contd.

(21) *Visnu*—contd.

A DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS.

VOLUME XVIII.

2. PRAŚAṀSĀ-STŌTRAS.

(1) ĀÑJANĒYA.

No. 9358. आञ्जनेयस्तोत्रम्.
ĀÑJANĒYASTŌTRAM.

Substance, palm-leaf. Size, $17\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 2. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 45*a*. The other works herein are Bhartṛhari-subhāṣita 1*a*, Paṇḍitarājaśataka 22*a*, Kavirākṣasīya 16*a*, Subhāṣita 51*a* and 54*b*, Cāṭuślōka 59*a*, Amarukaśataka 66*a*, Sumatiśataka (Telugu) 71*a*, Anyōktimālā 75*a*.

Complete.

A number of stanzas in praise of Āñjanēya or Hanumat who is said to have been one of the great monkey warriors that assisted Rāma in the fight against Rāvaṇa and who was the son of Añjanā, wife of Kēsarin, and born to Vāyu (the god of wind).

Beginning:

जयत्युद्दण्डदोर्दण्डखण्डितारातिमण्डलः ।
अपारमहिमा सोऽयमञ्जनानन्दवर्धनः ॥
उद्यन्मार्ताण्डबिम्बग्रहणकृतनिजोत्पातसंजातझञ्झा-
वातभ्राम्यद्विमानव्यथितसुरवधूदृष्टभूयिष्ठरूपः ।

संरम्भारूढजम्भप्रमथनरभसाविद्धकुम्भीन्द्रशुण्डा-
दण्डाकृष्टप्रचण्डो हरिररिनिकरं भीषणं पेषयेन्नः ॥

End:

घोरब्रह्मास्त्रवीर्योन्मथितकपिचमूवीक्षणोद्बुद्धकोपो-
द्बुद्धोऽभ्रोत्पातिभीमापघनजवसमाघाताभिन्नाम्बुदौघः ।
पुच्छाग्राघातकम्पत्रुटदुरुकटकग्रावफाट्कारघोर-
द्रोणाद्रिः सर्वदा वः शमयतु विपदं कामदो रामदूतः ॥

No. **9359.** हनुमदष्टकम्.

HANUMADAṢṬAKAM.

Substance, palm-leaf. Size, 12⅝ × 1⅛ inches. Pages, 4. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 28*a*. The other works herein are Kamalamālikā 1*a*, Bandhaślōkas 18*a*, Vēdāntadēśikastōtra 30*a*, Śyāmalādaṇḍaka 34*a*.

Complete.

Eight stanzas in praise of Hanumat by Vēnkaṭācārya, son of Nṛsiṁhaguru of Śrīvatsagōtra.

Beginning:

उद्यत्खद्योतबिम्बं पृथुलफलधियादित्सुरौत्सुक्यतो यो
हस्तात् प्रस्थादुदस्थान्नभसि सरभसा(सोऽ)रिष्टभूभृद्वरिष्ठे ।
उद्गच्छत्पुच्छवातोच्चलदचलगणोत्तुङ्गशृङ्गोद्धृताम्भो
वाहव्यूहो विहन्यादहितमिह महोद्दामभूमा हनूमान् ॥

End:

द्रोणक्षोणीधरं तं मणिगणरुचिरं क्षीरनीराकरस्य
प्रान्ते सन्तं समन्ताज्ज्वलितदशदिशं यत्र संजीविनी सा ।
उत्पाट्यावेक्ष्य वालाद्रणतलमनयत्तत्क्षणाल्लक्ष्मणार्थे
स द्रागभद्राय मे स्यात् कपिकुलतिलकः कामगो रामदूतः ॥

श्रीवात्स्यो वेङ्कटार्यो नृहरिगुरुसुतो राघवस्याज्ञयैवं
चक्रे स्तोत्रं हनूमद्विषयमधिगुणैरष्टभिः श्लोकरत्नैः ।
भक्त्यैतत्प्रत्यहं यः पठति स मनुजो जानकीजानिवीक्षा-
नित्योल्लासैकपात्रं प्रभवति विजयी जायते चाष्टदिक्षु ॥

No. 9360. हनुमत्स्तोत्रम्.

HANUMATSTŌTRAM

Pages, 2. Lines, 5 on a page.

Begins on fol. 185*a* of the MS. described under No. 5661.

Complete.

Similar to the above.

Its repetition is held to have the power to enable one to come out successful in disputations held before kings and in other assemblies.

Beginning:

अस्य श्रीआपदुद्धारकहनुमत्स्तोत्रमन्त्रस्य विभीषण ऋषिः, आपदुद्धारकहनुमान्देवता, मारुतात्मज इति बीजं, अञ्जनासूनुरिति शक्तिः, सीताशोकविनाशक इति कीलकं, लक्ष्मणप्राणदाता चेति मम अभीष्टद्वारा हनुमत्प्रीत्यर्थे जपे विनियोगः ।

ध्यानम्—

संवीतकौपीनमुदञ्चिताञ्जलिं समुज्ज्वलन्मौञ्ज्यजिनोपवीतिनम् ।
सकुण्डलं लम्बशिखं सवालधिं तमाञ्जनेयं शरणं भजाम्यहम् ॥

विभीषण उवाच—

आपन्नाखिललोकार्तिहारिणे श्रीहनूमते ।
अकस्मादागतोत्पातनाशनाय नमोऽस्तु ते ॥

End:

दुष्टदैत्यमहादर्पदलनाय नमोऽस्तु ते ।
ब्रह्मास्त्रस्तम्भनायास्मै नमः श्रीरुद्रमूर्तये ॥

जप्त्वा स्तोत्रमिदं पुण्यं वसुवारं पठेन्नरः ।
राजद्वारे सभास्थाने प्राप्तं वादं जयेद्ध्रुवम् ॥
विभीषणकृतं स्तोत्रं यः पठेत् सततं नर' ।
सर्वापद्भ्यो विमुच्येत नात्र कार्या विचारणा ॥

Colophon:

इति हनुमन्त(त्)स्तोत्रं संपूर्णम् ॥

No. **9361.** हनुमत्स्तोत्रम्.

HANUMATSTŌTRAM.

Page, 1. Lines, 5 on a page.

Begins on fol. 18*a* of the MS. described under No. 5661.

Complete.

Similar to the above.

Beginning and **End:**

लङ्काचण्डि, आञ्जनि, वायुपुत्र, मैरावणमर्दन, सूर्यभोजन, वीर, हनुमन्, तु मारमार वीरनारसिंहम् ॥

No. **9362.** हनुमत्स्तोत्रम्.

HANUMATSTŌTRAM.

Page, 1. Lines, 5 on a page.

Begins on fol. 184*a* of the MS. described under No. 5661.

Complete.

Similar to the above.

Beginning:

अञ्जनादेवीपुत्र, आसुरभयंकर, वायुकुमार, रुद्रावतार, तरुणार्क-कोमल, सुग्रीवसुचय(सचिव), रामदूत, समुद्रविलङ्घन, लङ्कापुरीदहन, लङ्किनीप्राणापहार ।

End:

पुत्रोत्पत्तिकारण, नीतज्वरप्रान्तिकज्वरान्त्रगतज्वरदृष्टिगतज्वरसमस्त-रोगनिवारण, त्रयोदशसन्धिभयनिवारण, श्रीं रां रुं फट् स्वाहा ॥

No. 9363. हनुमद्दण्डकम्.
HANUMADDAṆḌAKAM.

Pages, 4. Lines, 4 on a page.

Begins on fol. 32*a* of the MS. described under No. 5559.

Complete.

Similar to the above. This is written in a peculiar kind of metre styled Daṇḍaka.

Beginning:

श्रीमन्महाञ्जनागर्भसंभूत, सद्ब्रह्मचारिकपीन्द्रादिवन्द्य, किरिटोज्ज्वलद्रत्न-सत्कुण्डलाकर्णमौञ्जिधिर, दिव्ययज्ञोपवीताय ।

End:

रामदासाय तुभ्यं नमस्ते नमस्ते नमस्ते नमः ॥

No. 9364. हनुमद्भुजङ्गस्तोत्रम्.
HANUMADBHUJAṄGASTŌTRAM.

Pages, 3. Lines, 9 on a page

Begins on fol. 11*a* of the MS. described under No. 6090.

Complete.

Similar to the above. The authorship of this work is attributed to Śaṅkarācārya. The stanzas are composed in Bhujaṅgaprayāta metre; and this accounts for the name of the work.

Beginning:

प्रपन्नानुरागं प्रभाकाञ्चनाङ्गं जगद्गीतशौर्यं तुषाराद्रिधैर्यम् ।
तृणीभूतहेतिं रणोद्यद्विभूतिं भजे वायुपुत्रं पवित्रात्पवित्रम् ॥
भजे हेमरम्भावनीनित्यवासं भजे बालभानुप्रभाचारुभासम् ।
भजे चन्द्रिकाकुन्दमन्दारहासं भजे संततं रामभूपालदासम् ॥

End:

नमस्ते महाशौर्यधुर्याय तुभ्यं नमस्ते पराभूतसूर्याय तुभ्यम् ।
नमस्ते महासत्त्वबालाय तुभ्यं नमस्ते सदाब्रह्मचर्याय तुभ्यम् ॥
हनूमद्भुजङ्गं प्रभाते प्रभाते निशाचा(स्व)धैरात्रेऽपत्रास(भीतिः) स मर्त्यः।
पठन् वा शठोऽपि प्रमुक्ताघजालः सदा रामभक्तिं प्रसन्नां प्रयाति ॥

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्यवर्यादिश्रेष्ठपरोक्षसाक्षात्कारब्रह्मेन्द्र-श्रीशङ्कराचार्यविरचितं हनुमद्भुजङ्गं संपूर्णम् ॥

No. **9365.** हनुमद्भुजङ्गस्तोत्रम्.

HANUMADBHUJAṄGASTŌTRAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 238*b* of the MS described under Nos. 537 and 7247, wherein this work has been omitted to be included in the list of other works given therein.

Complete.

Similar to the above.

Beginning:

प्रपन्नानुरागं प्रभाकाञ्चनाङ्गं जगद्गीतशौर्यं तुषाराद्रिधैर्यम् ।

* * * *

. . . विशीर्णत्रिलोकं भजे चाञ्जनेयम् ।

End:

तुभ्यं नमस्ते महावज्रदेहाय तुभ्यं नमस्ते महाकाल . . . (न)मस्ते सदाब्रह्मचर्याय तुभ्यं नमस्ते मृत्युमर्त्यकार्याय तुभ्यं नमस्ते ॥

हनूमद्भुजङ्गप्रयातं प्रभाते विदुषः

* * * *

सदा रामभक्तिं प्रयातुम् ॥

Colophon:

शंकराचार्यविरचितं हनूमद्भुजङ्गप्रयातं संपूर्णम् ॥

---

(2) UMĀMAHĒŚVARA.

No. **9366.** पार्वतीपरमेश्वराष्टकम्.

PĀRVATĪPARAMĒŚVARĀṢṬAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 281*a* of the MS. described under Nos. 537 and 7247.

Complete.

Eight stanzas in praise of Pārvatī and her consort, Paramēśvara, *i.e.*, Śiva who is one of the gods of the Hindu trinity.

Beginning:

अम्भोधरश्यामलकुन्तलायै तटित्प्रभाताम्रजटाधराय।
निरीश्वरायै निखिलेश्वराय नमः शिवायै च नमः शिवाय॥

End:

अन्तर्बहिश्चोर्ध्वमधश्च मध्ये पुरश्च पश्चाच्च विदिक्षु दिक्षु।
सर्वं गतायै सकलं गताय नमः शिवायै च नमः शिवाय॥

---

(3) GAṄGĀ.

No. **9367.** गङ्गागीतिस्तोत्रम्.

GAṄGĀGĪTISTŌTRAM.

Substance, palm-leaf. Size, $12\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 62. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, new.

Breaks off in the 80th stanza.

A number of stanzas in Ārya-Gīti metre extolling the sanctity of the river Ganges who is said to be the wife of Śiva and daughter of Viṣṇu.

Beginning:

दारानर्धेन्दुमौलेर्हरिदयितसुतां मातरं षण्मुखस्या-
युग्माक्षीमिन्दुलेखाकुटजसुमवरस्यूतसीमन्तसीमाम्।
शुभ्रक्षौमं वसानां मणिखचितमहाभूषणाभूषिताङ्गीं
शृङ्गाराद्वैतभङ्गीं विमलतनुरुचिं तां परां नौमि गङ्गाम्॥

End:

चन्द्रकलामधुराङ्गीं चतुरतराटनजिताभ्रमातङ्गीम्।
आगमवनसारङ्गीमाश्रय गङ्गां शिरीषमृद्वङ्गीम्॥
श्रेयःशुभमणिपेटीं श्रीकण्ठस्वान्तभृङ्गसुमवाटीम्।
धारितसितन.

No. 9368. गङ्गाष्टकम्.
GAṄGĀṢṬAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 43*a* of the MS. described under No. 432.

Complete.

Eight stanzas on the sanctity of the river Ganges.

Beginning:

भगवति भवलीलामौलिमाले तवाम्भः-
कणमणुपरिमाणं प्राणिनो ये स्पृशन्ति ।
अमरनगरनारीचामरग्राहिणीनां
विगतकलिकलङ्काट(त)ङ्कमङ्के लुठन्ति ॥

End:

आदावादिपितामहस्य निगमव्यापारपात्रे जलं
पश्चात्पन्नगशायिनो भगवतः पादोदकं पावनम् ।
भूयः शम्भुजटाविभूषणमाणिर्जह्नोर्महर्षेरियं
कन्या कल्मषनाशिनी भगवती भागीरथी दृश्यते ॥

No. 9369. गङ्गाष्टकम्.
GAṄGĀṢṬAKAM.

Pages, 6. Lines, 5 on a page.

Begins on fol. 24*a* of the MS. described under No. 408, wherein this work has been mentioned as Gaṅgāstōtra in the list of other works given therein.

Complete.

Same work as the above, but with colophon. The stanzas are also arranged in different order and their authorship is attributed to the great Śaṅkarācārya, the disciple of Gōvinda.

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पादपूज्यशिष्य-श्रीमच्छङ्कराचार्यविरचितं गङ्गास्तोत्रं सम्पूर्णम् ॥

No. 9370. गङ्गाष्टकम्.
GAṄGĀṢṬAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 62*a* of the MS. described under No. 757.

Complete.

Similar to the above. By Vālmiki. The due repetition of these stanzas daily in the morning is said to enable one to free himself from the influence of Kali and to obtain salvation.

Beginning :

मातः शैलसुतासपत्नि वसुधालंकारहारावलि
स्वर्गारोहणवैजयन्ति भवतीं भागीरथीं प्रार्थये ।
त्वत्तीरे वसतस्त्वदम्बु पिबतस्त्वद्वीचिषु प्रेङ्खतः
त्वन्नाम स्मरतस्त्वदर्पितदृशः स्यान्मे शरीरव्ययः ॥

End:

गङ्गाष्टकं पठति यः प्रयतः प्रभाते
वाल्मीकिना विरचितं शुभदं मनुष्यः ।
प्रक्षाल्य गात्रकलिकल्मषपङ्कमाशु
मोक्षं लभेत् पतति नैव पुनर्भवाब्धौ ॥

No. 9371. गङ्गाष्टकम्.
GAṄGĀṢṬAKAM.

Page, 1. Lines, 5 on a page.

Begins on fol. 7*b* of the MS. described under No. 2037, wherein this work has been mentioned as Dēvīstuti in the list of other works given therein.

Incomplete.

Same work as the above

No. 9372. गङ्गाष्टकम्.
GAṄGĀṢṬAKAM.

Substance, palm-leaf. Size, 8¾ × 1 inches. Pages, 5. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 35*a*. The other works herein are Sundarēśvarastōtra 1*a*, Rāmanāmāṅkitastōtra 4*a*, Tattvamasipañcaka 7*a*, Cāṭuślōka 8*a*, Kaupīnapañcaka 11*a*, Mānasapūjāpañcaka 12*a*, Annapūrṇāstaka 14*a*, Viśvēśvarāṣṭaka 17*a*, Kālabhairavāṣṭaka 19*a*, Bilvāṣṭaka 21*a*, Śivaśaṅkarāṣṭaka 22*a*, Cidānandadvādaśaka 25*a*, Vāliśailanāthastōtra 28*a*, Laksmīnṛsiṁhakarāvalambastōtra 29*a*, Trivēṇīdaśaka 38*a*, Maṇikarṇikāṣṭaka 40*a*.

Complete.

Same work as the above.

No. 9373. गङ्गाष्टकम्.
GAṄGĀṢṬAKAM.

Pages, 3. Lines, 5 on a page

Begins on fol. 33*a* of the MS. described under No. 781.

Complete.

Same work as the above.

No. 9374. गङ्गाष्टकम्.
GAṄGĀṢṬAKAM.

Page, 1. Lines, 5 on a page.

Begins on fol. 21*a* of the MS. described under No. 2037, wherein this work has been mentioned as Gāṅgāstuti in the list of other works given therein.

Wants beginning.

Same work as the above.

No. 9375. गङ्गाष्टकम्.
GAṄGĀṢṬAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 11*a* of the MS. described under No. 5787, wherein this work has been mentioned as Bhāgīrathyaṣṭaka in the list of other works given therein

Complete.

Same work as the above, but with the addition of a stanza at the end which is given below :—

गङ्गे त्रैलोक्यसारे सकल . . . . विस्तीर्णतोये
पुण्ये ब्रह्मस्वरूपे हरिचरणरजोहारिणि स्वर्गमार्गे ।
प्रायश्चित्ताय दिव्यास्तव जलकणिका ब्रह्महत्यादिपापैः
कस्त्वां स्तोतुं समर्थस्त्रिजगदघहरे देवि गङ्गे प्रसीद ॥

No. 9376. गङ्गाष्टकम्—कर्णाटकटीकासहितम्.

GAṄGĀṢṬAKAM WITH KANARESE MEANING.

Pages, 18. Lines, 4 on a page.

Begins on fol. 91*a* of the MS. described under No. 5922, wherein this work has been mentioned as Gaṅgāstava in the list of other works given therein.

Complete.

This is a collection of eight stanzas taken from the two works described under Nos 9368 and 9370.

No. 9377. गङ्गाष्टकम्.

GAṄGĀṢṬAKAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 65*a* of the MS. described under No. 757.

Complete.

This is the same collection as the last, but with the addition of one stanza at the end, although the name is different. Probably this was composed by Vyāsa :

व्यासाष्टकमिदं स्तोत्रं प्रातरुत्थाय यः पठेत् ।
तस्य गङ्गाप्रसादेन गङ्गास्थानं न संशयः ॥

No. 9378. गङ्गाष्टकम्.

GAṄGĀṢṬAKAM.

Pages, 2. Lines, 11 on a page.

Begins on fol. 17*a* of the MS. described under No. 2398.

Complete.

Same work as that described under R. No. 226(*c*) of the Triennial Catalogue of MSS., Vol. I, Part I-A, which one wants beginning and end.

The copying of this manuscript is said to have been completed on Monday, the newmoon day of the month of Mārgaśiras, in the year Visu.

Beginning:

नमो देवि गङ्गे नमो मातृगङ्गे हरिचरणकमलमकरन्दे ।

End:

दीनार्तिनाशिनी देवी दिव्यानन्दस्वरूपिणी ।
सर्वतीर्थप्रिये देवि मध्याह्ने मणिकर्णिके ॥

No. **9379.** त्रिवेणीदशकम्.
TRIVEṆĪDAŚAKAM.

Pages, 2. Lines, 7 on a page

Begins on fol. 68*a* of the MS. described under No. 757.

Complete.

Ten stanzas on the sanctity of the Prayāga (near Allahabad), where the three sacred rivers, viz., the Ganges, the Yamunā and the Sarasvatī, which is said to be a subterranean river, meet: said to be by a Śaṅkarācārya.

Beginning:

मुक्तामयालंकृतमुक्तवेणी भक्ताभयाता(शा)सनबद्धवेणी ।
मत्तालिकुञ्जा मकरन्दवेणी श्रीमत्प्रयागे जयतु त्रिवेणी ॥
लोकत्रयैश्वर्यनिधानवेणी तापत्रयोच्चाटनबद्धवेणी ।
धर्मार्थकामाकलकै(नै)कवेणी श्रीमत्प्रयागे (जयतु त्रिवेणी) ॥

End:

श्रीमद्भवानी सकलैकवेणी लक्ष्मीसरस्वत्यभिमानवेणी ।
धात्री त्रिवेणीत्रयरत्नवेणी श्रीमत्प्रयागे (जयतु त्रिवेणी) ॥
. . . मध्ययानि हृदयैकवेणी ब्रह्माण्डभाण्डानुगतैकवेणी ।
बालत्रिवेणी रथरत्नवेणी श्रीमत्प्रयागे (जयतु त्रिवेणी) ॥

परम्परापातकहारिवेणी मत्तान्तकृत्सर्वनिदानवेणी ।
नतस्वधाकालधरित्रिवेणी श्रीमत्प्रयागे (जयतु त्रिवेणी) ॥
त्रिवेणीदशकं स्तोत्रं नित्यं प्रातः पठेन्नरः ।
तस्य पुण्याधिकं कृत्वा विचारादन्यमानितः ॥

Colophon:

इति शंकराचार्यविरचितं त्रिवेणीस्तोत्रं संपूर्णम् ॥

No. 9380. त्रिवेणीदशकम्.
TRIVĒṆĪDAŚAKAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 38*a* of the MS. described under No. 9372.

Complete.

Same work as the above, but with the addition of two stanzas in the beginning.

Beginning:

श्रुतिः प्रमाणं स्मृतयः प्रमाणं पुराणमव्यक्तपरं प्रमाणम् ।
यत्रास्ति गङ्गायमुने प्रमाणं स तीर्थराजो जयति प्रमाणम् ॥
सितासिते यत्र तरङ्गसंगते नद्यौ विभाते मुनिभानुकन्यके ।
लीलातपत्रं वट एव साक्षात् स तीर्थराजो जयति प्रयागः ॥

No. 9381. त्रिवेणीदशकम्.
TRIVĒṆĪDAŚAKAM.

Page, 1. Lines, 6 on a page.

Begins on fol. 56*b* of the MS. described under No. 5858, wherein it is stated as Trivēṇyaṣṭaka in the list of other works given therein.

Incomplete.

Same work as the above.

No. **9382.** भागीरथीस्तोत्रम्.

BHĀGĪRATHĪSTŌTRAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 258*a* of the MS. described under No. 119.

Complete.

In praise of the sacred river Ganges.

Beginning:

स्वर्गावतीर्णे अगरुतरु(सु)गन्धे नित्यं गिरिशिखाग्रनिधाने पुण्यागदर्शने शन्तनुराजसुपते(त्नि) भीष्मजननि महानदि शरणमुपैम्यहं भगवति गङ्गे ।

End:

गङ्गाहृदयप्रतिष्ठितं पुण्यगङ्गाशरीरोदकं ये पिबन्ति सर्वदेवतामुनिमिश्र सेवितं नमोऽस्तु देवि गङ्गे नमोऽस्तु देवि गङ्गे ॥

No. **9383.** भागीरथीस्तोत्रम्.

BHĀGĪRATHĪSTŌTRAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 18*b* of the MS. described under No. 2421.

Complete.

Same work as the above.

No. **9384.** मणिकर्णिकाष्टकम्.

MAṆIKARṆIKĀṢṬAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 42*b* of the MS. described under No. 432, wherein this work has been mentioned as Maṇikarṇikāstava in the list of other works given therein.

Complete.

Same work as the one described under R No. 226(*b*) of the Triennial Catalogue of MSS., Vol. I, Part I-A.

No. 9385. मणिकर्णिकाष्टकम्
MAṆIKARṆIKĀṢṬAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 10*a* of the MS. described under No. 5787.

Complete.

Same work as the above.

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्यविरचितं मणि-कर्णिकाष्टकं सम्पूर्णम् ॥

No. 9386. मणिकर्णिकाष्टकम्.
MAṆIKARṆIKĀṢṬAKAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 40*a* of the MS. described under No. 9372.

Incomplete.

Same work as the above.

---

(4) GARUḌA.

No. 9387. गरुडदण्डकः.
GARUḌADAṆḌAKAḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 12*b* of the MS. described under No. 429.

Complete.

Same work as the one described under R. No. 673(*j*) of the Triennial Catalogue of MSS., Vol. I, Part I-C.

By Vēdāntadēśika.

No. 9388. गरुडदण्डकः.
GARUḌADAṆḌAKAḤ.

Substance, palm-leaf. Size $12\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 4. Lines, 5 on on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 132*a*. The other works herein are Rāmacandramaṅgalāśāsana 1*a*, Vēdāntadēśikaprapatti 2*a*, Vēdāntā-

cāryasaptati 3b, Vēdāntācāryadinacaryā 14b, Vēdāntācāryavigrahadhyāna 17a, Tārāhārāvali 19b, Vēdāntācāryamaṅgaladvādaśaka 24a, Yatirājasaptati 25a, Śrīstuti 36a, Nyāsatilaka 40a, Abhītistava 44b, Bhagavaddhyānasōpāna 48b, Dayāśataka 50b, Varadarājapañcāśat 55b, Vēgāsētustōtra 71b, Aṣṭabhūjāṣṭaka 72b, Kāmāsikāṣṭaka 73b, Śaraṇāgatidīpikā 75a, Paramārthastuti 83a, Hayagrīvastōtra 84a, Gōpālaviṁśati 87a, Dēvanāyakapañcāśat 90b, Acyutaśataka 97b, Bhūstuti 115a, Gōdāstuti 118b, Garuḍapañcāśat 122a, Ṣōḍaśāyudhastōtra 133b, Sudarśanāṣṭaka 135, Bhagavaddhyānamuktāvali 136b, Śrīsthānamaṅgalāśāsana 138a, Daśāvatārastōtra 139a.

Complete.

Same work as the above.

No. 9389. गरुडदण्डकः.

GARUḌADAṆḌAKAḤ.

Substance, palm-leaf. Size, 15⅝ × 1½ inches. Page, 1. Lines, 10 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1a. The other works herein are Garuḍapañcāśat 1a, Kṛṣṇastuti 5a, Varadarājapañcāśat 6a, Kastūrītilakastōtra 10a, Śrīraṅgarājastava 15a.

Complete.

Same work as the above.

No 9390. गरुडदण्डकः.

GARUḌADAṆḌAKAḤ.

Substance, palm-leaf. Size, 13⅞ × 1½ inches. Pages, 2. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 19a. The other works herein are Abhītistava (with Tamil commentary) 1a, Daśāvatārastōtra 16b.

Complete.

Same work as the above.

No. 9391. गरुडदण्डकः.
GARUḌADAṆḌAKAḤ.

Substance, palm-leaf. Size, 15¼ × 1¼ inches. Pages, 2. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, new.

Begins on fol. 36*a*. The other works herein are Abhītistava-vyākhyā 1*a*, Garuḍapañcāśat 26*a*, Karigiridaṇḍaka 36*b*, Âcārya-daṇḍaka 38*b*, Nṛsiṁhadaṇḍaka 39*b*.

Wants the first stanza; otherwise complete.

Same work as the above.

No. 9392. गरुडदण्डकः.
GARUḌADAṆḌAKAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 202*a* of the MS. described under No. 9001.

Wants the first stanza; otherwise complete.

Same work as the above.

No. 9393. गरुडद्वादशकम्.
GARUḌADVĀDAŚAKAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 227*a* of the MS. described under No. 9001.

Complete.

Twelve stanzas in praise of Garuḍa who is the chief vehicle of God Viṣṇu.

Beginning:

क्षीराम्भोराशिमध्यस्थितविमलमहाद्वीपरत्नादिदिव्य-
प्रासादप्रान्तदेशोज्ज्वलकनकमहारत्नसिंहासनस्थः ।
विष्वक्सेनादिविष्णुप्रियसचिवकृतानेकपुष्पोपहारः
कद्रूपुत्राहिभूषाशनकृतनियमः पातु केतुर्मुरारेः ॥

End :

सौपर्णं स्तोत्रमेतत्पठति विषहरं द्वादशश्लोकजुष्टं
शुद्धात्मा यस्त्रिसन्ध्यं सकलखगकुलाधीश्वरस्याज्ञया सः ।
श्रेयः प्राप्नोत्यखण्डं पटुबलसहितं ज्ञानकर्मेन्द्रियाणां
कल्यत्वं दीर्घमायुर्विगतविम(षध)रव्रातभीतिं च भूतिम् ॥

Colophon :

इति गरुडद्वादशकं संपूर्णम् ॥

No. 9394. गरुडपञ्चाशत्.
GARUḌAPAÑCĀŚAT.

Pages, 19. Lines, 6 on a page.

Begins on fol. 26*a* of the MS. described under No. 9391.

Complete

A short poem in fifty stanzas by Vēdāntadēśika in praise of Garuḍa and his exploits.

It consists of five Varṇakas, viz., परव्यूहवर्णक, अमृताहरणवर्णक, नागदमनवर्णक, परिष्कारवर्णक, अद्भुतवर्णक, and is based on the Garuḍamantra.

Beginning :

श्रीमान् वेङ्कटनाथार्यः . . संनिधत्तां सदा हृदि ॥
अङ्गेष्वानन्दमुख्यश्रुतिशिखरमिलद्दण्डकं गंडपूर्वे
प्रागेवाभ्यस्य षट्सु प्रतिदिशमनघं न्यस्तशुद्धास्त्रबन्धाः ।
पाक्षिव्यत्यस्तपक्षद्वितयमुखपुटप्रस्फुटोदारतारं
मन्त्र गारुत्मतं तं हुतवहदयिताशेखरं शीलयामः ॥

End:

सैकां पञ्चाशतीं यामतनुत विनतानन्दनं नन्दयिष्यन्
कृत्वा मौलौ तदाज्ञां कविकथकघटाकेसरी वेङ्कटेशः ।

तामेतां शीलयन्तश्चलितविषधरव्याधिदैवाधिपीडाः
काङ्क्षापौरस्त्यलाभाः कृतमितरफलैस्ताक्ष्यकल्पा भवन्ति ॥

Colophon :

इति गरुडपञ्चाशति अद्भुतवर्णकः पञ्चमः ॥
कवितार्किकसिंहाय . . वेदान्तगुरवे नमः ॥

No. 9395. गरुडपञ्चाशत्.
GARUḌAPAÑCĀŚAT.

Substance, palm-leaf. Size, 15⅝ × 1⅝ inches. Pages, 6. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 4*a*. The other works herein are Śrīstuti 1*a*, Stōtraratna 7*a*.

Breaks off in the second Varṇaka.

Complete.

Same work as the above.

No. 9396. गरुडपञ्चाशत्.
GARUḌAPAÑCĀŚAT.

Substance, palm-leaf Size, 14⅜ × 1⅜ inches. Pages, 19. Lines, 5 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Garudapañcā-śadvyākhyā 11*a*.

Complete.

Same work as the above.

No. 9397. गरुडपञ्चाशत्.
GARUḌAPAÑCĀŚAT.

Pages, 9. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 9389.

Complete.

Same work as the above.

No. **9398.** गरुडपञ्चाशत्.
GARUḌAPAÑCĀŚAT.

Pages, 21. Lines, 6 on a page.

Begins on fol. 122*a* of the MS. described under No. 9388.

Complete.

Same work as the above.

No. **9399.** गरुडपञ्चाशत्.
GARUḌAPAÑCĀŚAT.

Pages, 3. Lines, 6 on a page.

Begins on fol. 224*b* of the MS. described under Nos. 537 and 7247.

Breaks off in the second Varṇaka.

Same work as the above.

No. **9400.** गरुडपञ्चाशद्व्याख्या.
GARUḌAPAÑCĀŚADVYĀKHYĀ.

Pages, 105. Lines, 6 on a page.

Begins on fol. 11*a* of the MS. described under No 9396.

Complete.

A commentary on the Garuḍapañcāśat of Vēdāntadēśika: by Rāmānujācārya of Vādhūlagōtra, grandson of Varadaguru who was himself the son of the granddaughter of Vēdāntācārya.

Beginning:

श्रीश्रीनिवासाश्रितमाश्रयामि तुङ्गं विहङ्गं फणिभूषिताङ्गम् ।
स्वपक्षरक्षाकरणेषु दक्षं पुराणवाणीसरणिप्रमाणम् ॥

निम्नस्य वेदशिखरार्यनिबन्धनस्य
व्याख्या मया क्रियत इत्यतिचित्रमेतत् ।
ध्वान्तावृतस्य जगतः स्फुरणाय नूनं
खद्योतकीटलघुकान्तिरिव प्रबुद्धा ॥

ताक्ष्यपञ्चाशतीमेनां विवृणोमि यथामति ।
महात्मानः सहृदया वीक्षन्तां करुणाकराः ॥

इह खलु विश्वातिशायिविश्वामित्रकुलतिलकभूतपुण्डरीकाक्षदीक्षितात्मजानन्तसूरिकुमारकविकथककेसरिनिरुपाधिकसर्वतन्त्रस्वातन्त्र्यचिह्नः श्रीरङ्गभूपालमहितवेदान्ताचार्यगुणनामधेयो वेङ्कटेशघण्टावतारो वेङ्कटनाथो नाम कविः क्षणदायां क्षणमात्रनिद्रायां स्वप्ने तु समस्तदेवताविषयेऽपि क्रियमाणं स्तोत्रवचनमस्मद्विषये न कर्तव्यं वेति सानुनयमाज्ञापितः तदैव गुरुपरम्परानुसन्धानपूर्वकं प्रबुध्य काल्ये द्रमिडदेशपरिष्कारभूताहीन्द्रपुरपरिसरविलसद्गरुडादितीर्थकलितनित्यकर्मानन्तरं पञ्चाक्षरीपरिशीलनात् साक्षात्कृतपरब्रह्मस्वरूपखगपतिः ततः सानन्दं शिरसि तदाज्ञां निधाय पञ्चवर्णीं पञ्चवर्णसंज्ञया परव्यूहामृताहरणनागमर्दनपरिष्कारासहायपरविभवप्रतिपादकपञ्चवर्णालङ्कृतां सकलव्यथाप्रशमनीं गरुडविषयकश्लोकपञ्चाशतीं चिकीर्षुः सन् अविघ्नपरिसमाप्त्यर्थं मङ्गलस्य कर्तव्यत्वात् आशीर्नमस्क्रियावस्तुनिर्देश इत्यलङ्कारारीत्या ऋषिच्छन्दोदेवतादिकं न्यासं मूर्तिध्यानपूर्वकं च यथातथं मन्त्रोपासनारूपां नमस्क्रियां करोति—अङ्गेष्विति। प्रागेव मन्त्रशीलनात्पूर्वमेव गंडपूर्वं गकारडकारपूर्वम्, बिन्दुसहितो गकारो बीजम् । केवलबिन्दुसहितो डकारः शक्तिः । एताभ्यामस्य मन्त्रस्य हुंकारबिन्दुदीर्घसहितं पं कीलकं, विश्वामित्र ऋषिः, त्रिष्टुप् छन्दः लक्ष्मीनारायणसहितगरुडरूपी देवता चैतानि गृह्यन्ते । तान्येतान्येव पूर्वं यस्मिन्कर्मणि तद्यथा भवति तथोक्तमिति क्रियाविशेषणम् ।

End:

कवितार्किककेसरी वेङ्कटनाथो गरुत्मदाज्ञां शिरसि निधाय प्रतिश्लोकं गरुडनदीतटाश्रयाश्वत्थवृक्षाश्रयस्य मनो नन्दयन् सन् गरुडपञ्चाशतमतनुत । तत्परिशीलनपराः सर्पव्याधिदैवमनःपीडाभयसमूहात् दूरी-

कृता इह लोके वाञ्छितेष्टवस्तुलाभापरित्यक्तधर्मार्थकामफला गरुत्मता सहैव वैकुण्ठवासोचिता भवन्तीत्यर्थः । कविकथकघटाकेसरीत्यत्र कविकथकश्रेणिरेव गजघटेत्यर्थे सति रूपकालङ्कारः ॥

Colophon:

इति विश्वामित्रकुलभूषणवेदान्ताचार्यपौत्रीसुतवरदगुरुपौत्रवाधूलकुलतिलकरामानुजाचार्यविरचिता गरुडपञ्चाशद्व्याख्या सम्पूर्णा ॥

No. 9401. गरुडपञ्चाशद्व्याख्या.

GARUḌAPAÑCĀŚADVYĀKHYĀ.

Substantce, palm-leaf. Size, 18⅜ × 1⅛ inches. Pages, 71. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete.

Same work as the above.

(5) GAṆAPATI.

No. 9402. गणपतिमन्त्राक्षरावलिस्तोत्रम्.

GAṆAPATIMANTRĀKṢARĀVALISTŌTRAM.

Pages, 5. Lines, 16 on a page.

Begins on fol. 13*b* of the MS. described under No. 424, wherein it is stated as Mantrāvalistōtra in the list of other works given therein.

Complete.

Herein each of the letters of the Gaṇapatimantra begins a stanza which is in praise of Ganapati who is considered to be the son of Śiva and Pārvatī and to have the power of removing all obstacles.

Beginning:

श्रीदेव्युवाच—

विना तपो विना ध्यानं विना होमं विना जपम् ।
अनायासेन विघ्नेशप्रीणनं वद मे प्रभो ॥

महेश्वर उवाच—

मन्त्राक्षरावलिस्तोत्रं महासौभाग्यवर्धनम् ।
दुर्लभं दुष्टमनसां सुलभं शुद्धचेतसाम् ॥
महागणपतिप्रीतिप्रतिपादकमञ्जसा ।
कथयामि घनश्रोणि कर्णाभ्यामवतंसय ॥
ओङ्कारवलयाकारमुच्चकल्लोलमालिकम् ।
ऐक्षवं चेतसा वीक्षे सिन्धुसंधुक्षितस्वनम् ॥

End:

हारकेयूरमकुटकटकाङ्गदकुण्डलैः ।
अलङ्कृतं च विघ्नानां हर्तारं देवमाश्रये ॥
इति मन्त्रावलीस्तोत्रं कथितं तव सुन्दरि ।
समस्तमीप्सितं तेन संसाधय शिवं शिवम् ॥

No. 9403. गणपतिमन्त्राक्षरावलिस्तोत्रम्.

GAṆAPATIMANTRĀKṢARĀVALISTŌTRAM

Pages, 4. Lines, 19 on a page.

Begins on fol. 66*a* of the MS. described under No. 426, wherein this work has been mentioned as Gaṇēśamantrākṣarīstōtra 65*b* in the list of other works given therein.

Complete.

Same work as the above.

No. 9404. गणेशनवरत्नमाला.

GAṆĒŚANAVARATNAMĀLĀ.

Pages, 2. Lines, 19 on a page.

Begins on fol. 70*b* of the MS. described under No. 426, wherein this work has been mentioned as Gaṇēśaratnamālā in the list of other werks given therein.

Complete.

Similar to the above. This contains nine stanzas in praise of Gaṇēśa, the stanzas beginning in order with each of the nine letters

of the Gaṇapatimantra. The fourth quarter of each stanza is a quotation from the Vedic hymns.

Beginning:

श्रीकण्ठतनय श्रीश श्रीकर श्रीदलार्चित ।
श्रीविनायक सर्वेश श्रियं वासय मे कुले ॥
गजानन गणाधीश द्विजराजविभूषित ।
भजे त्वां सच्चिदानन्द ब्रह्मणां ब्रह्मणस्पते ॥

End:

महापातकसंघातैर्महारणभयापहम् ।
त्वदीयकृपया देव सर्वानवयजामहे ॥
नवरत्नमयीं मालां नवाक्षरसमन्विताम् ।
तव भक्त्या ये पठन्ति तेषां तुष्टा गणाधिप(पाः) ॥

Colophon:

इति गणेशनव(रत्न)माला समाप्ता ॥

No **9405.** गणेशाष्टकम्.

GAṆĒŚĀṢṬAKAM.

Pages, 2. Lines, 4 on a page.

Begins on fol. 3*a* of the MS. described under No. 5422.

Complete.

Eight stanzas in praise of Gaṇēśa.

Beginning:

गिरिस्वामिकन्यावराङ्के वसन्तं
सुरस्वामिनं केलिरूपं हसन्तम् ।
लघुस्वल(स्थूलं)विघ्नं वि(नि)घ्नन्तमाद्यं
सदानन्दरूपं गणेशं भजेऽहम् ॥

End:

प्रियासिद्धिभाजे दयावामभागे
लसन्माध्विकावासुदेवं त्रिणेत्रम् ।

अमोघं सुरेशं महेशानमीशं
सदानन्दरूपं गणेशं भजेऽहम् ॥

No. 9406. गणेशाष्टकम्.
GANĒŚĀṢṬAKAM.

Page, 1. Lines, 6 on a page.

Begins on fol. 29*a* of the MS. described under No. 764.

Complete.

Same work as the above.

No. 9407. गणेशाष्टकम्.
GAṆĒŚĀṢṬAKAM.

Pages, 4. Lines, 3 on a page.

Begins on fol. 1*a* of the MS. described under No. 1876, wherein this work has been omitted to be mentioned as other work contained therein.

Complete.

Similar to the obove.

Beginning:

शुक्लाम्बरधरं . . . . . शान्तये ॥
यं ब्रह्म वेदान्तविदो वदन्ति परं प्रधानं पुरुषं तथान्ये ।
विश्वोद्गतेः कारणमीश्वरं वा तस्मै नमो विघ्नविनायकाय ॥
एकदन्तं महाकायं तप्तकाञ्चनसंनिभम् ।
लम्बोदरं विशालाक्षं वन्देऽहं गणनायकम् ॥

End:

गणाष्टकमिदं पुण्यं यः पठेत्सततं नरः ।
सिध्यन्ति सर्वकार्याणि विद्यावान् धनवान्भवेत् ॥
मूषकवाहन मोदकहस्त चामरकर्ण विलम्बितसूत्र ।
वामनरूप महेश्वरपुत्र विघ्नविनायकपाद नमस्ते ॥

No. 9408. गणेशाष्टकम्.

GAṆĒŚĀṢṬAKAM.

Substance, palm-leaf. Size, $15\frac{5}{8} \times 1\frac{1}{8}$ inches. Pages, 2. Lines, 4 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Rāmāyaṇa 2*a*.

Complete.

Same work as the above.

No. 9409. गणेशाष्टकम्.

GAṆĒŚĀṢṬAKAM.

Pages, 3. Lines, 4 on a page. Character, Kanarese.

Begins on fol. 1*a* of the MS. described under No. 3525, wherein this work has been omitted to be mentioned as other work contained therein.

Complete.

Same as the above.

No. 9410. गणेशाष्टकम्.

GAṆĒŚĀṢṬAKAM.

Substance, palm-leaf. Size, $15\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 2. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Rāmāyaṇa 2*a*.

Complete.

Same work as the above.

No. 9411. विनायकस्तोत्रम्.

VINĀYAKASTŌTRAM.

Page, 1. Lines, 7 on a page

Begins on fol. 89*a* of the MS. described under No. 3122, wherein this work has been mentioned as Vināyakādidhyāna in the list of other works given therein.

A eulogy on Vināyaka who is the same as Gaṇapati.

Beginning and **End:**

गजवक्त्रं चतुर्बाहुं त्रिणेत्रं चैकदन्तकम् ।
करण्डमकुटोपेतं सर्वाभरणभूषितम् ॥
शिरश्चक्रप्रभां कृत्वा पद्मपीठस्य मध्यमे ।
दाडिमीपुष्पसंकाशमुरगैश्च विभूषितम् ॥
पाशाङ्कुशधर ताम्रफलिकं त्वाखुवाहनम् ॥

No. **9412.** विनायकस्तोत्रम्.

VINĀYAKASTŌTRAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 72*a* of the MS. described under No. 3776.

Complete.

Similar to the above.

Beginning:

गण्डस्थलद्वयगलन्मदवारिधारासौरभ्यलुभ्यदलिडिम्भकगुम्भनादैः ।
वाचालिताखिलदिशं वरदं नतानां वन्दामहे गजमुखं वयमादिदेवम् ॥
गर्विष्ठखेचरपुरत्रयनामदैत्यभङ्गोद्यतः स्वयमयं परमेश्वरोऽपि ।
आदौ यमेव परिपूज्य विधूतसर्वविघ्नो जिगाय तमिमं वयमाश्रयामः ॥

End:

समीरैः प्रोच्चण्डैः श्रवणयुगसंचालनभवैः
नतानां प्रत्यूहच्छलजलदराशिं विदलयन् ।
कटाभोगोद्यन्मदसुरभिलाशेषभुवनः
शिखाचन्द्रोत्तंसप्रणयपरिणामोऽवतु गजः ॥

No. **9413.** विनायकस्तोत्रम्.

VINĀYAKASTŌTRAM.

Pages, 3. Lines, 4 on a page. Character, Kanarese.

Begins on fol. 2*a* of the MS. described under No. 3525, wherein this work has been omitted to be mentioned as other work contained therein.

Complete; as found in the Brahmāṇḍapurāṇa.

Beginning:

देवदेवसुतं देवं जगद्विघ्नविनायकम् ।
हस्तिरूपं महाकायं सूर्यकोटिसमप्रभम् ॥
वामनं जटिलं कान्तं ह्रस्वग्रीवं महोदरम् ।
धूम्रसिन्दूरयुग्गण्डं प्रकटं विकटोत्कटम् ॥

End:

इदं जप्यं च होमं च सन्ध्योपासनमेव च ॥
इष्टसिद्धिमवाप्नोति सत्यं सत्यं वदाम्यहम् ।
सर्वमङ्गलमङ्गल्यं सर्वव्याधिविनाशनम् ॥

Colophon:

इति ब्रह्माण्डपुराणे स्कन्दप्रोक्तं विनायकस्तोत्रं संपूर्णम् ॥

(6) GĀYATRĪ.

No. 9414. गायत्रीभुजङ्गः.
GĀYATRĪBHUJAṄGAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol 9*a* of the MS. described under No. 6187.

Complete; as found in the Brahmatāntrika of the Brahmāṇḍapurāṇa.

This is in praise of the goddess Gāyatrī written in a peculiar kind of metre called Bhujaṅgaprayāta; and its due repetition is held to be efficacious in absolving a person from his sins. The goddess Gāyatrī seems to be no otherthan the Gāyatrī prayer-formula personified.

This manuscript work is said to have been transcribed by Ātukūri Mallappa for Śanagavarapu Bhīmanna, the copying having been completed on the 9th day of the bright fortnight of the month of Caitra in the year Nandana.

Beginning:

उषःकालगम्यामुदात्तस्वरूपामकारप्रतिष्ठामुदाराङ्गभूषाम् ।
अजेशादिवन्द्यामजार्धाङ्गभाजामनूपम्यरूपां भजेमृ(जाम्या)द्यसन्ध्याम् ॥

End:

इतीदं भुजङ्गं पठेदिष्टभक्त्या समाधाय चित्ते सदा श्रीभवानीम् ।
त्रिसन्ध्यस्वरूपां त्रिलोकैकवन्द्यां स मुक्तो भवेत्सर्वपापैरजस्रम् ॥

Colophon:

इति ब्रह्माण्डपुराणे ब्रह्मतान्त्रिके ब्रह्मनारदसंवादे गायत्रीभुजङ्गः समाप्तः ॥

No. 9415. गायत्रीभुजङ्गः.
GĀYATRĪBHUJAṄGAḤ.

Pages, 3. Lines, 23 on a page.

Begins on fol. 157 of the MS. described under No. 446.

Complete.

Same work as the above.

No. 9416. गायत्रीभुजङ्गः.
GĀYATRĪBHUJAṄGAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 34*a* of the MS. described under No. 29.

Complete.

Same work as the above.

No. 9417. गायत्रीभुजङ्गः.
GĀYATRĪBHUJAṄGAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 22*a* of the MS. described under No. 5541.

Complete.

Same work as the above.

No. 9418. गायत्रीभुजङ्गः.

GĀYATRĪBHUJANGAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 33*a* of the MS. described under No. 2886.

Complete.

Same work as the above.

Colophon :

इति ब्रह्माण्डपुराणे गायत्रीभुजङ्गः समाप्तः ॥

No. 9419. गायत्रीवन्दनस्तोत्रम्.

GĀYATRĪVANDANASTŌTRAM.

Pages, 2. Lines, 6 on a page

Begins on fol. 8*a* of the MS. described under No. 29

Complete.

Similar to the above.

Beginning :

अस्य श्रीगायत्रीसावित्रीसरस्वतीवन्दनस्तोत्रमहामन्त्रस्य सान्दीपिनि-भगवानृषिः, गायत्री छन्दः, गायत्री देवमाता देवता ।

* * * *

सन्ध्ये देवि महाभागे सर्वलोकनमस्कृते ।
त(त्व) दुपासनमात्रेण सर्वपापैः प्रमुच्यते ॥

End :

प्रणम्य परमात्मानं जपित्वा भक्तिसंयुतम् ।
सौ(स्व) आत्मानमभिध्यायेत् दण्डवत्प्रणमेद्भुवि ॥

Colophon :

इति श्रीगायत्रीवन्दनं सम्पूर्णम् ॥

No. 9420. गायत्रीस्तवराजः.

GĀYATRĪSTAVARĀJAḤ.

Pages, 5. Lines, 24 on a page.

Begins on fol. 143*b* of the MS. described under No. 446.

Complete; as found in the Viśvāmitrakalpa.

Similar to the above.

This Stōtra is said to have been revealed by the sage Viśvāmitra and its concluding stanzas describe the efficacy caused by its repetition daily in the morning.

Beginning:

ब्रह्मास्त्रं ब्रह्मदण्डं शिरसि शिखिमहाब्रह्मशीर्षं नमोऽन्तं
सूक्तं पारायणोक्तं प्रणवपरमहावाक्यसिद्धान्तमूलम् ।
तुर्यं त्रीणि द्वितीयं प्रथममनुमहावेदवेदान्तसूक्तं
नित्यं स्मृत्यानुसारं नियमितचरितं मूलमन्त्रं नमोऽन्तम् ॥

End:

विश्वामित्रसमुद्धृतं हितकरं सर्वार्थसिद्धिप्रदं
स्तोत्राणां परमं प्रभातसमये पारायणं नित्यशः ।
सन्धानां विधिवादमन्त्रसकलं सिद्धिप्रदं तं सदा
संप्राप्नोत्यमरत्वसर्वसुखदं चायुष्यमारोग्यदम् ॥

Colophon:

इति विश्वामित्रकल्पे वसिष्ठविश्वामित्रसंवादे गायत्रीस्तवराजं(जः) सम्पूर्णम्(ः) ॥

No. 9421. गायत्रीस्तवराजः.

GĀYATRĪSTAVARĀJAḤ.

Pages, 2. Lines, 19 on a page.

Begins on fol. 30*a* of the MS. described under No. 2886.

Complete.

Same as the above.

Colophon:

इति विश्वामित्रकल्पे गायत्रीस्तवराजः समाप्तः ॥

No. 9422. गायत्रीस्तोत्रम्.
GĀYATRĪSTŌTRAM.

Pages, 74. Lines, 5 on a page.

Begins on fol. 37*a* of the MS. described under No. 204, wherein it is found included in Visvāmitrakalpa given therein in the list of other works.

Complete; as found in the Viśvāmitrakalpa.

Similar to the above.

Beginning:

अजस्रमदनिष्यन्दलहरीलालितालकैः ।
कबलीकृतविघ्नाय पुराणकरिणे नमः ॥
तां भू(पदेऽङ्कु)रितां सूक्ष्मां नाभौ पल्लवितां पराम् ।
हृदि कोरकितां वाणीं वक्त्रे कुसुमितां न(नु)मः ॥
सहस्रदलपङ्कजां सकलशीतरश्मिप्रभां
वराभयकराम्बुजां विमलगन्धपुष्पाम्बराम् ।
प्रसन्नविरलेक्षणां सकलदेवतारूपिणीं
स्मरेच्छिरसि हंसगां त(द)भिदा(धा)नपूर्वं गुरुम् ॥
स्वगुरुं पूजयेदेवमुपचारैस्तु पञ्चकैः ।
भक्तिश्रद्धानुसारेण विश्वामित्रं प्रकल्पयेत् ॥
अस्य मन्त्रस्य प्रश्नस्य प्राणापानौ निरुन्धयेत् ।
प्राणापानौ नियम्याथ गुरुपूजापुरस्सरम् ॥
प्रातरुत्थाय यो विप्रः स्वात्ममूलस्थकुण्डलिम् ।
प्रबोधे तु प्रभातायाँ गायत्रीं तत्र चिन्तयेत् ॥

End:

विश्वामित्रसमुद्धृतं हितकरं सर्वार्थसिद्धिप्रदं
स्तोत्राणां प्रणवं प्रभातसमये पारायणे नित्यशः ।
वेदानां विधिवादमन्त्रसफलं सिद्धिप्रदं सर्वदा
संप्राप्नोत्यमरत्वसर्वसुखदं आ(चा)युष्यमारोग्यदम् ॥

Colophon:

इति विश्वामित्रकल्पे गायत्रीस्तोत्रं सम्पूर्णम् ॥

No. **9423.** गोसावित्रीस्तोत्रम्.

GŌSĀVITRĪSTŌTRAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 209*a* of the MS. described under No. **5661**, wherein it is given as Sāvitrīstōtra in the list of other works given therein.

Complete; said to be taken from the Śāntiparvan of the Mahābhārata.

In this work the goddess Sāvitrī, who is the same as Gāyatrī, is conceived in the form of a divine cow and is praised.

Beginning:

व्यास उवाच—

नारायणं नमस्कृत्य देवं त्रिभूवनेश्वरम् ।
गोसावित्रीं प्रवक्ष्यामि व्यासेन प्रस्तुतां पुरा ॥

गवां स्तोत्रं प्रवक्ष्यामि सर्वपापप्रणाशनम् ।
गोभिर्निश्वसिता वेदाः सषडङ्गपदक्रमाः ॥

एतासामग्रतः शृङ्गेष्विन्द्राविष्णू स्वयं स्थितौ ।
शिरो ब्रह्मा उरःस्कन्धौ ललाटे गोवृषध्वजः ॥

End:

संवत्सरकृतात्पापात्पठमानो न लिप्यते ।
फलं च गोसहस्रं च इत्युक्तं ब्रह्मणः पुरा ॥

Colophon:

इति शान्तिपर्वणि गोसावित्रीस्तोत्रं सम्पूर्णम् ॥

(7) JINA.

No. 9424. अकलङ्कस्तोत्रम्.
AKALAṄKASTŌTRAM.

Substance, paper. Size, $9\frac{1}{2} \times 3\frac{5}{8}$ inches. Pages, 6. Lines, 7 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol. 24*b*. The other works herein are Sindūraprakāra (Subhāsita) 1*a*, Sajjanacittavallabha 20*b*, Drstāstaka 27*a*, Adyāsṭaka 29*a*.

Complete.

This is in praise of Akalaṅka, a Jina, probably the same as is referred to by Mānikyanandi in his work on Nyāya called Parīksāmukha

Beginning:

त्रैलोक्यं सकलं त्रिकालविषयं सालोकमालोकितं
साक्षाद्येन यथास्वयं करतले रेखात्रयं साङ्गुलि ।
रागद्वेषभयामयान्तकजरालोलत्वलोभादयो
नालं यत्पदलङ्घनाय स महादेवो मया वन्द्यते ॥
दग्धं येन पुरत्रयं शरभुवा तीव्रार्चिषा वह्निना
यो वा नृत्यति मत्तवत्पितृवने यस्यात्मजो वा गुहः ।
सोऽयं किं मम शङ्करो भयतृषादोषातिमोहक्षयं
कृत्वा(कर्ता) यः स तु सर्वविक्तनुभृतां क्षेमंकरः शङ्करः ॥

End:

किं वन्द्यो भगवानमेयमहिमा देवोऽकलङ्कः कलौ
काले यो जनतासुधर्मनिहितो देवोऽकलङ्को जिनः ।
यस्य स्फारविवेकमुद्रलहरीज्वाले प्रमेयाकुला
निर्मग्नं तनुतेतरां भगवते तारा शिरःकम्पनम् ॥
सा तारा खलु देवता भगवती मानोऽपि मान्यामपि
षण्मासावधि जाड्यसाङ्ख्यभगवान् भट्टाकलङ्कः प्रभो ।

वाक्कल्लोलपरम्पराभिरमते नूनं मनो मज्जनः
व्यापारस्य हते स्म(राह)तमतिः संताडितेनुस्तत(?) ॥

Colophon:

इति श्रीअकलङ्कस्तोत्र(त्रं) समाप्तः(प्तम्) ॥

No. 9425. अजितपञ्चकम्.
AJITAPAÑCAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 49*b* of the MS. described under No. 8734, wherein it is given as Jinastōtra in the list of other works given therein.

Complete.

Five stanzas in praise of Ajitanātha who is considered to be the second of the twenty-four Tīrthaṅkaras.

Beginning:

यस्य प्रभावात्त्रिदिवच्युतस्य क्रीडास्वपि क्षीबमुखारविन्दः ।
अजेयशक्तिर्भुवि बन्धुवर्गश्चकार नामाजित इत्यवन्ध्यम् ॥

End:

स ब्रह्मनिष्ठः सममित्रशत्रुर्विद्याविनिर्वान्तकषायदोषः ।
लब्धात्मलक्ष्मीरजितोऽजितात्मा जिनः श्रियं मे भगवान् विधत्तात् ॥

No. 9426. अद्याष्टकम्.
ADYĀṢṬAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 29*a* of the MS. described under No. 9424.

Complete.

Eight stanzas in praise of Jina. Each stanza begins with the word Adya and expresses the devotee's feelings of spiritual exaltation consequent on his seeing Jina.

Beginning:

अद्य मे सफलं जन्म नेत्रे च सफले मम ।
त्वामद्राक्षं यतो देव हेतुमक्षयसंपदः ॥

अद्य संसारगम्भीरपारावारः सुदुस्तरः ।
सुतरो यत् क्षणेनैव जिनेन्द्र तव दर्शनात् ॥

End :

अद्याहं सुकृती भूतो निर्धूताशेषकल्मषः ।
भुवनत्रयपूज्योऽहं जिनेन्द्र तव दर्शनात् ॥
अद्याष्टकं पठेद्यस्तु गुणानन्दितमानसः ।
तस्य सर्वार्थसंसिद्धिः जिनेन्द्र तव दर्शनात् ॥

Colophon :

इति श्रीस्तुति(जिन)स्तोत्रं समाप्तम् ॥

No. 9427. अनन्तनाथपञ्चकम्.
ANANTANĀTHAPAÑCAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 54*b* of the MS. described under No. 8734, wherein it is included in the general name Jinanāthapañcaka 50*a* in the list of other works given therein.

Complete.

Five stanzas in praise of Anantanātha who is considered to be the fourteenth Tīrthaṅkara.

Beginning :

अनन्तदोषाशयविग्रहो ग्रहो विषङ्गवान्मोहमयश्चिरं हृदि ।
यतो जितस्तत्त्वरुचौ प्रसीदता त्वयाजितोऽभूद्भगवाननन्तजित् ॥

End :

त्वमीदृशस्तादृश इत्ययं मम प्रलापलेशोऽल्पमतेर्महामुने ।
अशेषमाहात्म्यमनीरयन्नहो शिवाय संस्पर्श इवामृताम्बुधेः ॥

No 9428. अभिनन्दनपञ्चकम्.
ABHINANDANAPAÑCAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 50*b* of the MS. described under No. 8734, wherein it is included in the general name Jinanāthapañcaka 50*a* in the list of other works given therein.

Complete.

Five stanzas in praise of the fourth Tīrthankara named Abhinandana.

Beginning:

गुणाभिनन्दादभिनन्दनो भवान्दयावधूं क्षान्तिसखीमशिश्रियत् ।
समाधितन्त्रस्तदुपोपत्तये द्वयेन नैर्गन्ध्यगुणानबा(यू)युजत् ॥

End:

स्वभानुबन्धो स्वजनस्य तापिकास्तृषोऽभिवृद्धिः सुखतो नभःस्थितिः ।
इति प्रभो लोकहितं यतो मतं ततो भवानेव गतिः सतां मतः ॥

No. 9429. अरनाथस्तोत्रम्.
ARANĀTHASTŌTRAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 56*a* of the MS. described under No. 8734, wherein this work has been omitted to be mentioned in the list of other works given therein

Complete.

In praise of the eighteenth Tīrthaṅkara named Aranātha.

Beginning:

गुणस्तोकं समुल्लङ्घ्य तद्बहुत्वकथास्तुतिः ।
आनन्त्यात्ते गुणा वक्तुमशक्यास्त्वयि सा कथम् ॥

End:

इति निरुपमयुक्तिशासनप्रियहितयोगगुणानुशासनः ।
अरजिन दमतीर्थनायकस्त्वमिव सतां प्रतिबोधनाय कः ॥

मतिगुणविभवानुरूपतस्त्वयि वरदागमदृष्टिरूपतः ।
गुणकृशमपि किंचनोदितं मम भवताद्दुरितापनोदकम् ॥ २० ॥

No. 9430. अर्हत्स्तोत्रम्—कर्णाटकटीकासहितम्.
ARHATSTŌTRAM WITH KANARESE COMMENTARY.

Pages, 22. Lines, 6 on a page.

Begins on fol. 11*a* of the MS. described under No. 5157.

Complete.

In praise of Arhat Vardhamāna. The nature of the dream dreamt by a woman, who is to conceive and give birth to a Jina, is described in the beginning.

Beginning:

पञ्चकल्याणनादाय . . . . . तायविनाशिने ।
पञ्चमज्ञाननेत्राय जिनेन्द्राय नमो नमः ॥

* * * *

हस्तीन्द्रं वृषभं हरिं सरसिजं मौलौ सुधांशुं रविं
मीनं पूर्णघटं सरोजजलधिं सिंहासनं स्वर्भुवाम् ।
गेहं भोगिनिकेतनं मणिगणं वह्निं च यस्याम्बिका
स्वप्नेऽपश्यदसौ जिनो भवतु मे दुःस्वप्नविच्छित्तये ॥

End:

श्रेयोमार्गानभिज्ञानिह भवगहने जाज्वलद्दुःखदाव-
स्कन्धे चङ्क्रम्यमाणानतिचकितमिमानुद्धरेयं वराकान् ।
इत्यारोहत्त्वरानुग्रहरसविलसत्पावनोपात्तपुण्य-
प्रक्रान्तैरेव वाक्यैः शिवपथमुचितान् शास्ति योऽर्हन् स नोऽव्यात् ॥

* * * *

Colophon:

इत्यर्हत्स्तोत्रं कर्णाटकव्याख्यासहितं समाप्तम् ॥

No. **9431.** अहमादिभक्तिः.

AHAMĀDIBHAKTIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 47*b* of the MS. described under No. 8734, wherein this work is stated to begin on fol. 46*b* in the list of other works given therein.

Complete.

On the necessity for the destruction of egoistic impulses in man.

Beginning:

व्युत्सृज्य दोषान्निःशेषान् सिद्धा शिष्योत्तमोत्सृतौ ।
सरितोप्युप(म)गोर्मिं कर्मैकं बध्यतेतराम् ॥

ध्यानाशुशुक्षणाविद्धे मनऋत्विक्समाहितः ।
स्वकर्मसमिधो भावसर्पिषा जुहुमोऽधुना ॥
अहमेवाहमित्यात्मा ज्ञानादन्यत्र चेतसाम् ।
इदमस्ति करोमीदमिदं भुञ्ज इति क्षिपे ॥

End:

बोधिसमाधिविशुद्धिः स्वचिदुपलब्ध्युच्चलत्प्रमोदभराः ।
ब्रह्म विदन्ति परं ये ते सद्गुरवो मम प्रसीदन्तु ॥

* * * *

गमणं समाहिमरणं जिणगुणसंपत्तिहोम्मज्झम् ॥

No. **9432.** आचार्यभक्तिः.

ĀCĀRYABHAKTIḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 27*b* of the MS. described under No. 8734.

Complete.

Stanzas showing the supplicant's devotion towards the Jaina religious teachers.

Beginning:

सिद्धगुणस्तुतिनिरतानुद्धूतरुषाग्निजालबहुलविशेषान् ।
गुप्तिभिरभिसंपूर्णान्मुक्तियुजः सत्यवचनलक्षितभावान् ॥
मुनि(सु)महात्मविशेषान् जिनशासनसत्प्रदीपभासुरमूर्तीन् ।
सिद्धिं प्रपित्सुमनसो बद्धरजोविपुलमूलघातनकुशलान् ॥

End:

अभिनौमि सकलकलुषप्रभवोदयजन्ममरणबन्धनमुक्तान् ।
शिवममलमनघमक्षयमव्याहतमुक्तिसौख्यमस्त्विति सततम् ॥

* * * *

श्रुतमविकलं शुद्धा वृत्तिः परप्रतिबोधनी
परिणतिरुरूद्योगो मार्गप्रवर्तनसद्विधौ ।

बुधनुतिरनुत्सेको लोकज्ञता मृदुतास्पृहा
यतिपतिगुणा यस्मिन्नन्ये भवन्ति गुरुः सताम् ।

No 9433. एकीभावस्तुतिः.
ĒKĪBHĀVASTUTIḤ.

Pages, 12. Lines, 7 on a page.

Begins on fol. 31*b* of the MS. described under No. 8738.

Complete.

This is also called Kalyāṇastava and is in praise of Jina. Herein it is taught that the accumulation of Karma which brings, about severe sorrow, can be conquered only by devotion to Jina.

Beginning:

एकीभावं गत इव मया यः स्वयं कर्मबन्धो
घोरं दुःखं भवभंवगतो दुर्निवारः करोति ।
तस्याप्यस्य त्वयि जिनरवे भक्तिरुन्मुक्तये चे-
ज्जेतुं शक्यो भवति न तया कोऽपरस्तापहेतुः ॥

End:

भक्तिप्रह्वमहेन्द्रपूजितपद त्वत्कीर्तने न क्षमाः
सूक्ष्मज्ञानदृशोऽपि संयमभृतः के हन्त मन्दा वयम् ।
अस्माभिः स्तवनच्छलेन तु परस्त्वय्यादरस्तन्यते
स्वात्माधीन सुखैषिणां स खलु नः कल्याणकल्पद्रुमः ॥

Colophon:

इति कल्याणस्तवः समाप्तः ॥

No. 9434. एकीभावस्तुतिः.
ĒKĪBHĀVASTUTIḤ.

Pages, 7. Lines, 7 on a page.

Begins on fol. 73*a* of the MS. described under No. 8734, wherein this work has been said to begin on fol. 70*a* in the list of other works given therein.

Complete.

Same work as the above.

No. 9435. कुण्ठुनाथपञ्चकम्.
KUNṬHUNĀTHAPAÑCAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 55*b* of the MS. described under No. 8734, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

Five stanzas in praise of the seventeenth Tīrthaṅkara, Kuṇṭhunātha.

Beginning:

कुण्ठुप्रभृत्यखिलसत्त्वदयैकतानः कुण्ठुर्जिनो ज्वरजरामरणोपशान्त्यै ।
त्वं धर्मचक्रमिह वर्तयति स्म भूत्यै भूत्वा पुरा क्षितिपतीश्वरचक्रपाणिः॥

End:

यस्मान्मुनीन्द्र तव लोकपितामहाद्या
विद्याविभूतिकणिकामपि नाप्नुवन्ति ।
तस्माद्भवन्तमजमप्रतिमेयमार्य-
स्तुत्यं स्तुवन्ति सुधियः स्वहितैकतानाः ॥

No. 9436. ग्रहस्तोत्रम्.
GRAHASTŌTRAM.

Pages, 6. Lines, 4 on a page.

Begins on fol. 40*a* of the MS. described under No. 8754.

Complete.

In praise and propitiation of the planets.

Beginning:

श्रीमत्त्रिलोकीतिलकायमानो मानोन्नतो भद्रसरोजभानु(ः) ।
देवेन्द्रनागेन्द्रनरेन्द्रवृन्दवन्द्यो जिनेन्द्रो विबुदा(धं) ।वदि(ध)त्ता(त्) ॥
श्रीमदर्हत्परमेष्ठी सुप्रसन्नो वरदो भवतु ।

End:

अन्ये तिथीशग्रहयक्षयक्षीदिक(न्य)कादिक्पतिदेवतौघाः ।
द्वाराद्रिदिव्यध्वजदेवताश्च कुर्वन्तु शान्तिं जिनभाक्तिकानाम् ॥
तिथिग्रहसर्वदेवाः सुप्रसन्नाः ॥

Colophon:

ग्रहस्तोत्रं समाप्तम् ॥

No. 9437. ग्रहस्तोत्रम्.
GRAHASTŌTRAM

Pages, 4. Lines, 6 on a page.

Begins on fol. 68*a* of the MS. described under No. 8735, wherein this work has been mentioned as Siddhaparamēṣṭhi-prārthanā in the list of other works given therein.

Complete.

Same work as the above

No 9438. चन्द्रप्रभगद्यम्.
CANDRAPRABHAGADYAM.

Page, 1. Lines, 6 on a page.

Begins on fol. 3*b* of the MS. described under No. 8735.

Incomplete.

Written in a kind of rhythmic prose and in praise of Candra-prabha who is the eighth Tīrthaṅkara.

Beginning:

श्रीमद्वाणिप्रणूतप्रचुरगुणमणिश्रेणिसंघातवेणि-
क्षोणीपाणिप्रणामारुचिरतनुमनश्चन्द्रकान्त्ये(न्तै)कचन्द्रः ।
ख्याता भूतिप्रभूतिप्रचुरगुणमाणिर्जीतजीमूत जिष्णो
सर्वज्ञायोनमस्मै(स्ते)शिवसुखमचलं चन्द्रनाथो जिनेन्द्र ॥

. . . सरोजराज(जि)विहितविहरणस्य कुपथविपथवेदना[व]
वावदूकभीषणस्य चरणनलिनभजनसुजनसिद्धिवृद्धिदायकस्य ।

End :

हिमगुबिम्बविडम्बतुण्डरोचिष्णुन यमनियममियतजनसुकृतवर्धिष्णुना ।

No. **9439.** चन्द्रप्रभपञ्चकम्.

CANDRAPRABHAPAÑCAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 52*a* of the MS. described under No. 8734, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

Five stanzas in praise of the eighth Tīrthaṅkara called Candraprabha.

Beginning :

चन्द्रप्रभं चन्द्रमरीचिगौरं चन्द्रं द्वितीयं जगतीव शारदम् ।
वन्देऽभिवन्द्यं महतामृषीन्द्रं जिनं जितस्वान्तकषायभिन्नम् ॥

End :

स चन्द्रमा भव्यकुमुद्वतीनां विच्छिन्नदोषाभ्रकलङ्कलेपः ।
व्याकोश(च)वाग्जालमयूखमालः पायात्पवित्रो भगवान् मनो मे ॥

No **9440.** चन्द्रप्रभपञ्चकम्.

CANDRAPRABHAPAÑCAKAM.

Pages,). Lines, 5 on a page.

Begins on fol. 17*a* of the MS. described under No. 8746.

Complete.

Same work as the above.

No. **9441.** चन्द्रप्रभस्तोत्रम्.

CANDRAPRABHASTŌTRAM.

Pages, 11. Lines, 5 on a page.

Begins on fol. 75*a* of the MS. described under No. 8747, wherein this work has been mentioned as Candraprabbagadya in the list of other works given therein.

In praise of Candraprabha who is considered to be the eighth Tīrthaṅkara : by Śabdabrahmakavi.

Beginning :

सुगतिपथमवेष्ट स्वाघशत्रून् व्यजेष्ट
स्मरतरुमलविष्ट प्राणिनोऽन्वग्रहिष्ट ।
प्रवचनमतनिष्ट श्रीवधूं योऽवरिष्ट
प्रचुरगुणसनाथः पातु वश्चन्द्रनाथः ॥
अपि च सुरासुरविहितपरीष्टिः स्वपरविकासककेवलदृष्टिः ।
पावनतरपरमागमसृष्टिः पीवरबोधवधूकुचदृष्टिः ॥

End :

पुरुषोत्तम निरुपम मृत्युञ्जय करणवनोषणदावधनञ्जय ।
लपितामृततोषितलोकत्रय कोपणपुरीचन्द्रप्रभ जय जय ॥
मृदुपदगतिजितमदभरगजगतविधुमुखगुरुकुचमधुकरनिभकच ।
सुरतबलाकुलविरचितकरतलसुरतरुणीकरतलविरचितपूजन ॥
इति कोपणतीर्थचन्द्रप्रभ जिन तव पादकमलयोरस्तु ।
शब्दब्रह्मकवीन्द्रप्रथितोदाहरणमालिकापूजा ॥

No. 9442. चारित्रभक्तिः. CĀRITRABHAKTIḤ.

Pages, 6. Lines, 7 on a page.

Begins on fol. 34*b* of the MS. described under No. 8734. Complete.

In praise of the good observances and conduct of the Jinas.

Beginning :

येनेन्द्रान् भुवनत्रयस्य विलसत्केयूरहाराङ्गदान्
भास्वन्मौलिमणिप्रभाप्रविसरोत्तुङ्गोत्तमाङ्गान्नतान् ।
स्वेषां पादपयोरुहेषु मुनयश्चक्रुः प्रकामं सदा
वन्दे पञ्चतयं तमद्य निगदन्नाचारमभ्यर्हितम् ॥

End:

चारित्रं सर्वजिनैश्चरितं प्रोक्तं च सर्वशिष्येभ्यः ।
प्रणमामि पञ्चभेदं पञ्चमचारित्रलाभाय ॥
धर्मः सर्वसुखाकरो हितकरो धर्मं बुधाश्चिन्वते
धर्मेणैव समाप्यते शिवसुखं धर्माय तस्मै नमः ।
धर्मान्नास्त्यपरः सुहृद्भव(त्तनु)भृतां धर्मस्य मूलं दया
धर्मे चित्तमहं दधे प्रतिदिनं हे धर्म मां पालय ॥

* * * *

गमणं समाहिमरणं जिणगुणसंपत्तिहोम्मज्झम् ॥

No. 9443. चैत्यवन्दनम्.
CAITYAVANDANAM.

Pages, 7. Lines, 7 on a page.

Begins on fol. 17*a* of the MS. described under No. 8734.

Complete

Stanzas showing the supplicant's respect and veneration towards the Jaina shrines.

Beginning:

यावन्ति जिनचैत्यानि विद्यन्ते भुवनत्रये ।
तावन्ति सततं भक्त्या त्रिः परीत्य नमाम्यहम् ॥

End:

तदेतदमरेश्वरप्रबलमौलिमालामणि-
स्फुरत्किरणचुम्बनीयचरणारविन्दद्वयम् ।
पुनातु भगवन् जिनेन्द्र तव रूपमन्दीकृतं
जगत्सक(ल)मन्यतीर्थगुरुरूपदोषोदयः ॥

No. 9444. चैत्यस्तुतिः.
CAITYASTUTIḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 22*a* of the MS. described under No. 5167.

Complete.

Herein the Jaina supplicant conceives the temples of the Tīrthaṅkaras as being found in almost all conceivable places and then offers his worship to those temples.

Beginning:

सद्भक्त्या देवलोके रविशशिभवने व्यन्तराणां निकाय्ये
नक्षत्राणां निवासे ग्रहगणपटले तारकाणां विमाने ।
पाताले पन्नगेन्द्रस्फुटमणिकिरणे ध्वस्तसान्द्रान्धकारे
श्रीमत्तीर्थंकराणां प्रतिदिवसमहं तत्र चैत्यानि वन्दे ॥

End:

स्वर्गे मर्त्येऽन्तरिक्षे गिरिशिखरह्रदे स्वर्णदीनीरतीरे
शैलाग्रे नागलोके जलनिधिपुलिने भूरुहाणां निकुञ्जे ।
ग्रामेऽरण्ये वने वा स्थलजलविषमे दुर्गमध्ये त्रिसंध्यं
श्रीमत्तीर्थंकराणां प्रतिदिवसमहं तत्र चैत्यानि वन्दे ॥

No. 9445. जिनतूणकस्तोत्रम्.
JINATŪṆAKASTŌTRAM.

Pages, 3. Lines, 6 on a page.

परमकारुणिकम्, शरणागतसंरक्षकम्, श्रितजनश्रीदायकम्, श्रीभूमिनीलानायकम्, निःसीमपौरुषम्, परमपूरुषम्, श्रीभूवराहमित्थमापादचूडमनुभूय पुनः पुनः निर्भरानन्दसंदोहभरितमेव सततमपि सुखी(खि)भव सुखी(खि)भव ॥

No. **10345.** **वराहाष्टकम्.**

VARĀHĀṢṬAKAM.

Pages, 2. Lines, 20 on a page.

Begins on fol. 112*a* of the MS. described under No. 4910.

Complete.

Eight stanzas similar to the above. Probably by Varadaguru, the author of Kārikādarpaṇa.

Beginning:

कमलायतनेत्राय कमलायतनोरसे ।
वराहवपुषे दैत्यवराहवपुषे नमः ॥ १ ॥

End:

झटिति विलुठदुर्वीचाटुवाचाटासिन्धुस्फुटपटहविदस्वरफोटदीप्तोटमुद्यत् ।
खरखुरपुटघाताधूतखाटारिवाटः कपटाकिटिरघौघाटोपमुच्चाटयेन्नः ॥ ८ ॥
यत्कारिकादर्पणाख्यकृतिनावा भवाम्बुधिम् ।
सन्तस्तरन्ति वरदगुरवे श्रीमते नमः ॥

No. 10346. विष्णुचतुर्विंशतिनामस्तोत्रम्.
VIṢṆUCATURVIṀŚATINĀMASTŌTRAM.

Pages, 5. Lines, 22 on a page.

Begins on fol. 95*a* of the MS. described under No. 1552 wherein it is stated as Caturvimśatināmastōtra in the list of othe, works.

Complete.

A hymn consisting of twenty-five stanzas in praise of Viṣṇu, who is here called under twenty-four different names and conceived as bearing the Śaṅkha, Cakra, Gadā and Padma in his four hands in twenty-four different ways. The work is said to have been composed in Śaka 1803, Viṣu year (1881 A.D.), by Śēṣa.

Beginning:

यो द्वन्द्वे करयोर्दरं रथपदं सव्येतरे संवहन्
ऊर्ध्वाधःस्थितिनि द्वयं च कलयन् वामे गदापद्मयोः ।
भक्तानामखिलार्थकल्पकतरुः सर्वैः समाराध्यते
श्रीनाथो विभवाय संकलयतां भूयात्स नः केशवः ॥ १ ॥

ऊर्ध्वाधःस्थितिना द्वयेन करयोर्वामेतरेणामलं
शङ्खं पद्ममथापरेण च गदां चक्रं दधानो ज्वलत् ।
मत्तारातिमतङ्गजेन्द्रनिवहे यो वीरसिंहायते
भूयान्नो मधुसूदनः कलयतां स श्रेयसे भूयसे ॥

End:

सर्वेशः खलु केशवादिकचतुर्विंशत्याभिख्याभिदा-
युक्तांस्तानविशेषितायुधवरैः कुर्वन् पुमानादिमः ।
अर्थत्वेन निजाह्वयान् विरचयत्यद्धा चतुर्वर्गदां-
स्तानप्यर्थतया पठन्ति भुवि ये स्तोत्रं स्वकीयं त्विदम् ॥

Colophon:

चतुर्विंशतिनामस्तोत्रं कविशेषकृतं समाप्तम् ॥
शाकेन गण्ये गुणशून्यदन्तिभूभिर्विषौ बाहुळकृष्णपक्षे ।
षष्ठ्यामिदं भार्गववाररात्रौ स्तोत्रं समाप्तं कविशेषकर्तुः ॥

No. **10347.** विष्णुदशकम्.

VIṢṆUDAŚAKAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 35*b* of the MS. described under No. 9729.

Complete.

Ten stanzas in praise of God Viṣṇu.

Beginning:

राम हरे कृष्ण हरे तव नाम वदामि सदा नृहरे ।
नामस्मरणादन्यमुपायं नहि पश्यामो भवतरणे ॥ १ ॥

End:

दुष्टजनोद्धताशिक्षक ते कलितुरगोत्तमरूप हरे ।
कलियुगभूसुरपाल नमो भक्तं ते परिपालय माम् ॥ १० ॥

राम—

एनं पठन्ति भक्त्या तु ये जना विगतस्पृहाः ।
तेषां करगता मुक्तिर्भवेन्नास्त्यत्र संशयः ॥

No. 10348. विष्णुदशकम्.

VIṢṆUDAŚAKAM.

Pages, 2 Lines, 6 on a page.

Begins on fol. 69*a* of the MS. described under No. 757, wherein it is given as Viṣṇunāmasaṅkīrtana in the list of other works.

Incomplete.

Same work as the above.

No. 10349. विष्णुपारम्यस्तोत्रम्.

VIṢṆUPĀRAMYASTŌTRAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 4993.

Complete.

A number of stanzas extolling the greatness and supreme nature of God Viṣṇu :` by one Varada.

Beginning :

उद्यद्भानुसहस्रभास्वरपरव्योमास्पदं निर्मल-
ज्ञानानन्दघनस्वरूपममलं ज्ञानादिभिः षड्गुणैः ।
जुष्टं श्यामलविग्रहं धृतरथाङ्गाब्जासिभूषोज्ज्वलं
श्रीभूसेव्यमनन्तभोगिनिलयं श्रीवासुदेवं भजे ॥

End :

यो देवादिचतुर्विधेषु (धासु) तनुषु ब्रह्माण्डकोशान्तरा
संभक्तेषु चराचरेषु निविशन्नास्ते सदान्तर्बहिः ।
विष्णुं तं निखिलेष्वणुष्वणुतरं भूयः सुभूयस्तरं
साङ्गुष्ठप्रमितं च योगिहृदयेष्वासीनमीशं भजे ॥
प्रातर्विष्णोः परत्वादिपञ्चकस्तुतिमुत्तमाम् ।
पठन्नाप्नोति भगवद्भक्तिं वरदनिर्मिताम् ॥

No. 10350. विष्णुभुजङ्गः.
VIṢṆUBHUJAṄGAḤ.

Pages, 4. Lines, 8 on a page.

Begins on fol. 19*b* of the MS. described under No. 5781.

Complete.

A hymn in praise of God Viṣṇu in the Bhujaṅgaprayāta metre : by Śāṅkarācārya.

Beginning:

चिदंशं विभुं निर्मलं निर्विकल्पं निरीहं निराकारमोङ्कारगम्यम् ।
गुणातीतमव्यक्तमेकं तुरीयं परं ब्रह्म यं वेद तस्मै नमस्ते ॥

End:

भुजङ्गप्रयातं पठेद्यस्तु भक्त्या समाधाय चित्ते भवन्तं मुरारे ।
स मोहं विहायाशु युष्मत्प्रसादात् समाश्रित्य योगं व्रजेदच्युतत्वम् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशङ्कराचार्यविरचितं विष्णुभुजङ्ग-स्तोत्रं संपूर्णम् ॥

No. 10351. विष्णुभुजङ्गः.
VIṢṆUBHUJAṄGAḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 74*b* of the MS. described under No. 9001.

Complete.

Same work as the above.

No. 10352. विष्णुसप्तविभक्तिस्तोत्रम्.
VIṢṆUSAPTAVIBHAKTISTŌTRAM.

Pages, 4. Lines, 8 on a page.

Begins on fol. 27*a* of the MS. described under No. 9662.

Complete.

Stanzas in praise of God Viṣṇu, his name occurring in the stanzas in the seven different declensional cases in order: by Vēṅkaṭārya, the third son of Bukkapaṭṭaṇam Tirumala Aṇṇayārya.

Beginning:

वरारविन्दमन्दिराधराधरातिमाधुरी-
रमाधुरीणखेल . . . . नायकायितः ।
सुखाय कायजायताकृतिर्ममाद्य जायता-
मजायताण्डकाण्डभृत्स कुण्डलीन्द्रताण्डवः ।। १ ।।

End:

त्वमेव मे रमेश शेवधिर्दधीय धीमयं
भवन्तमन्तरामुना सनाथवानिहास्मि ते ।
नमत्समस्तशस्तये भवत्त एव ते वयं
न याम(?)दासतासतामुदासतां धियस्त्वयि ।। ९ ।।
विनिर्मलाद्य तिर्मलान्ववायबुक्कपट्टणा-
न्वयाण्णयार्ययज्वनस्तृतीयसूनुनामुना ।
प्रणीय वेङ्कटार्यवर्यदासकेन रासके-
लिभासकस्य मासखस्य सत्कृतिः पदेऽर्पिता ।। २९ ।।

No. 10353. विष्णुस्तवः.
VIṢṆUSTAVAḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 82*b* of the MS. described under No. 9001.

Complete; as found in the Nṛsiṁhapurāṇa.

A hymn in praise of God Viṣṇu.

Beginning:

संसारवृक्षमारुह्य द्वन्द्वपाशशतैर्दृढैः ।
बद्धा घनं स तैस्तैर्यः पतितो योनिसागरे ।।
यः कामक्रोधलोभैस्तु विषयैः परिपीडितः ।
बद्धः स्वकर्मभिर्गौणैः पुत्रदारेषणादिभिः ।।

* * * *

निष्कलं विरजं विष्णुं सदा ध्यायन् विमुच्यते ।
आराधयेत् सदा सत्यं ध्यायेद्विष्णुं समाहितः ।।

End :

ध्यायन्ति ये विष्णुमनन्तमच्युतं हृत्पद्ममध्ये सततं व्यवस्थितम् ।
उपासकानां प्रभुमीश्वरेश्वरं ते यान्ति सिद्धिं परमां तु वैष्णवीम् ॥

Colophon :

इति श्रीनृसिंहपुराणे शङ्करप्रणीतं(तः) श्रीविष्णुस्तवः समाप्तः ॥

No. **10354.** विष्णुस्तोत्रम्.
VIṢṆUSTŌTRAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 148*a* of the MS. described under No. 9147.

Incomplete.

Similar to the above.

Beginning :

नाभीपद्मभवच्चतुर्मुखमुखोद्गीर्णस्तवाकर्णन-
प्रोन्मीलत्कमनीयलोचनकलाखेलन्मुखेन्दुद्युतिः ।
सक्रोधं मधुकैटभौ सकरुणास्नेहं सुतामम्बुधेः
सोच्छ्वासप्रणयं सरोजवसतिं पश्यन् हरिः पातु वः ॥

End :

ऊर्ध्वाण्डच्छत्रदण्डः शतधृतिभवनाम्भोरुहो नालदण्डः
क्षोणीनौकूपदण्डः क्षरदमरसरित्पट्टिकाकेतुदण्डः ।
ज्योतिश्चक्राक्षदण्डस्त्रिभुवनविजयस्तम्भ . . . .

No. **10355.** विष्णुस्तोत्रम्.
VIṢṆUSTŌTRAM.

Pages, 13. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 2770, wherein it is apparently wrongly stated as Virṇusmṛti in the list of other works.

Complete.

Same work as the above.

No. 10356. विष्णुस्तोत्रम्.

VIṢṆUSTÔTRAM.

Pages, 5. Lines, 5 on a page.

Begins on fol. 256*a* of the MS. described under Nos. 537 and 7247, wherein it is given as Ṣōḍaśanāmadhyāna in the list of other works.

Complete.

Similar to the work described under No. 10346.

The transcription of this manuscript is stated to have been completed on Saturday, the third day of the bright fortnight of the month of Jyēṣṭha, in the year Īśvara.

Beginning:

श्रीकेशवं करतलोद्धृतरम्यपद्मं चन्द्रप्रभाविशदनिर्मलपाञ्चजन्यम् ।
मार्ताण्डकोटिरुचिरोज्ज्वलतीक्ष्णचक्रं वन्दे गदाधरमहं सुरबृन्दवन्द्यम् ॥ १ ॥

नारायणध्यानम्—

नारायणं हरि(र)विरिञ्चिविचिन्त्यमानमिष्टार्थदं सकलभक्तजनैः सुसेव्यम् ।
शङ्खेन्द्रनीरजगदाविमलारिहस्तं चेतो विचिन्तय सदा परमं पुमांसम् ॥ २ ॥

End:

नीलाञ्जनश्यामलदेहकान्तिं सुवर्णवर्णाम्बरमायताक्षम् ।
शङ्खारिगदाब्जविधृतस्वरूपं श्रीकृष्णमूर्तिं प्रणमामि देवम् ।। १४ ॥

Colophon:

इति केशवनामानि समाप्तानि ॥

श्रीमत्पद्मासनस्थं शशिहिमधवलं शान्तमानन्दकन्दं
वामाङ्कारूढलक्ष्मीवरकुचमुकुलन्यस्तहस्तं प्रशस्तम् ।
ऊर्ध्वे शङ्खं च चक्रं दधतु(तम)भयहरं(दं) दक्षिणे सव्यहस्तं(स्ते)
वन्दे लक्ष्मीनृसिंहं . . . . वासवादिव्य(त्य)वन्द्यम् ॥

No. 10357. विष्णुस्तोत्रम्.

VIṢṆUSTŌTRAM.

Pages, 9. Lines, 7 on a page.

Begins on fol. 67*a* of the MS. described under No. 10101.

Complete.

Similar to the above.

By Nārāyaṇapaṇḍitācārya, son of Trivikramācārya, who prays to the God worshipped at Trivandram.

Beginning:

विष्णोरस्मान्पदाब्जे कृतनिवसतयः पांसवः पावयन्तु
श्रीमन्तः श्रीकवर्यां कुसुमसुनिचये पूरयन्तः परागान् ।
लालाख्यां लेखिकायामजनिपवनयोरक्षतां निक्षिपन्तः
पौनःपुन्येन शुद्धिं हरशिरसि नते जाह्नवीं जोषयन्तः ॥ १ ॥

End:

पुण्ये पूर्णतमः पुराणपुरुषः सज्ज्ञानसौख्यादिभिः
देवो दिव्यतनुर्निजे पुरवरे पद्मानुरागास्पदे ।
स्यानन्दूरपुरे पुरंदरहरब्रह्मादिभिः पूर्वजैः
पूज्ये पूज्यतमो वसन्नसुलभां भक्तिं प्रदद्यान्मम ॥ ३३ ॥

Colophon:

इति श्रीमत्कविकुलतिलकश्रीमत्त्रिविक्रमाचार्यसुतश्रीमन्नारायणपण्डिताचार्यविरचिता विष्णुस्तुतिः समाप्ता ॥

The name of the scribe and the date of transcription are thus given:—

शुक्ले मार्गशिरे धनिष्ठसहिते चम्पाख्यषष्ठीदिने
श्रीविष्णुस्तुतिमालिखच्छुभदिने श्रीरङ्गपट्णे गुरौ ।
बालो बुद्धिवरः प्रसिद्धकुलजः साहेबलोनामको
वन्देऽहं न(तु) स नारसिंहभजकस्तन्नामकं मङ्गलम् ॥

No. **10358.** विष्णुस्तोत्रम्.

VIṢṆUSTŌTRAM.

Substance, palm-leaf. Size, $11\frac{7}{8} \times 1\frac{1}{8}$ inches. Pages, 20. Lines, 5 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Begins on fol. 13*a*. The other works herein are Mahimnas-stava 1*a*, Malhaṇastava 9*b*, Bālāṣṭaka 10*a*, Indrākṣīstōtra 11*a*.

Wants beginning.

Similar to the above.

Beginning:

. . . . कीर्तनेन ।
कीर्तिर्विवर्धति धनंजयकीर्तनेन
माद्रीसुतौ कलयतां न भवन्ति रोगाः ॥ १ ॥

ब्रह्मोवाच—
नमामि नारायणपादपङ्कजं करोमि नारायणपूजनं सदा ।
वदामि नारायणनाम निर्मलं स्मरामि नारायणतत्त्वमव्ययम् ॥ २ ॥

इन्द्र उवाच—
नारायणो नाम नरो नराणां प्रसह्य यो नः कथितः पृथिव्याम् ।
अनेकजन्मार्जितपापसंचितं हरत्यशेषं स्मृतमात्र एव ॥ २ ॥

End:

यः पठेत्प्रातरुत्थाय वैष्णवं स्तोत्रमुत्तमम् ॥ ८२ ॥
स सम्यग्ज्ञानमासाद्य विष्णुसायुज्यमाप्नुयात् ।
श्रीविष्णुसायुज्यमाप्नुयादित्यों नम इति ॥
कृष्णं कमलपत्राक्षं पुण्यश्रवणकीर्तनम् ।
वासुदेवं जगद्योनिं नौमि नारायणं हरिम् ॥

No. **10359.** विष्णुस्तोत्रम्.

VIṢṆUSTŌTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 1*b* of the MS. described under No. 9610, and not on fol. 2*a* as stated therein

Complete.

Similar to the above.

Beginning :

जय जय भो जगदीश गुणमुक्तामणिकोश

विघटितभवपाश जलधिसुताधीश ।

नलिनदलादप्यरुणौ नियमिसतीकृतकरुणौ

तव हृतमायावरणौ जीयास्तां(कोमलौ) चरणौ ॥ १ ॥

End :

शार्ङ्गाख्यं धृतकाण्डं जयति हरेः(चारु) कादण्डम् ।

रिपुपटलीकृतदण्डं(संयति) रुचि(वि)जितमार्ताण्डम् ॥ १४ ॥

असिवल्लीसाहायो जयति करस्तव भूयः ।

जगदवनैकविधेयः कविसुखधौरेयः ॥ १५ ॥

No. 10360. विष्णुस्तोत्रम्.
VISṆUSTŌTRAM.

Page, 1. Lines, 5 on a page.

Begins on fol. 59*a* of the MS. described under No. 757.

Incomplete.

Similar to the above. This work consits of six stanzas written in Āryā metre and intended to be sung, and it is hence called Ṣaṭpadī.

Beginning :

अविनयमपनय विष्णो दमय मनः कुरु मदीयमृगतृष्णाम् ।

भूतदयां विस्तारय तारय संसारसागरतः ॥

End :

दामोदर गुणमन्दिर सुन्दरवदनारविन्द गोविन्द ।

भवजलधिमथनमन्दरमपनय त्वं मे ।

नारायण करुणामय शरणं करवाणि तावकौ चरणौ ॥

इति षट्पदी मदीया(ये) वदनसरोजे सदा वसतु ॥

No. 10361. विष्णुस्तोत्रम्.

VIṢṆUSTŌTRAM.

Page, 1. Lines, 13 on a page.

Begins on fol. 99*a* of the MS. described under No. 255, wherein this work has been mentioned as Ṣaṭpadīstōtra in the list of other works given therein.

Complete.

Same work as the above, with colophon as given below which attributes the authorhip of the work to Śaṅkarācārya.

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्यविरचितं षट्-पदीस्तोत्रं संपूर्णम् ॥

No. 10362. विष्णवष्टकम्.

VISṆVASṬAKAM

Page, 1. Lines, 7 on a page.

Begins on fol. 35*a* of the MS. described under No. 9729.

Complete.

Eight stanzas in praise of God Viṣṇu said to have been composed by Vālmīki.

Beginning:

नन्दनन्दन नवनीतचोर बृन्दावनकामुक गोविन्द मुरहर ।
पालय नित्यं राम मनुवंशाम्बुधिसोम मुनिजनवन्दितचरण ॥ १ ॥

End:

परमपावन पापविदूरग परमात्मन्परात्पर पार्थसारथे ।
पालय नित्यं राम मनुवंशाम्बुधिसोम मुनिजनवन्दितचरण ॥ ८ ॥
वाल्मीकिना कृतं पूर्वं हरिभक्तमुदावहम् ।
नामाष्टकं मुमुक्षुभ्यश्चिरं जीवतु भूतले ॥

No. 10363. वृषाद्रिनाथस्तोत्रम्.
VṚṢĀDRINĀTHASTŌTRAM.

Pages, 6. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 2191.

Complete.

In praise of God Śrīnivāsa as worshipped in the temple on the sacred hills of Tiruppati: by Ragunāthārya of Tirunantāl family and a disciple of Aṁmaṅgi Vēṅkaṭācārya.

Beginning:

श्रीशेषशिखरिस्वामिन् रमाभृद्वक्षसस्तव ।
विलसत्पद्मसंकाशौ चरणौ शरणं भजे ॥
त्वत्कल्याणगुणाङ्कितामृतवचःपाली सुधास्यन्दिनी
नृत्यन्ती वदने स्वयं विलसते मूढस्य मे श्रीविभो ।
क्षोणीमण्डलसंस्थसर्वरसिका . . . .
. . . . . शनतत्परे वनमृगे व्याप्ता न किं चन्द्रिका ॥

* * * *

ग्रह्लादः करिराड्विभीषण इति ख्याताश्च भक्ता ह्यमी
भक्त्या लब्धभवत्कृपापरिणतां तां लेभिरे संपदम् ।
तस्मात्केचिदहो सहेतुकपरां व्याचक्षते त्वत्कृपां
तेषां भक्तिमनिन्दित. तव कृपालब्धां कथं नोचिरे ॥

End:

श्रीशेषशैलशिखरे चिदचिद्विशिष्टं श्रीसंश्रितोरसमपारकृपैकपात्रम् ।
आपादशीर्षमवलोक्य हरे जनास्त्वां भक्ताभयप्रद सदैव मुदं लभन्ते ॥
अम्मङ्गिवेङ्कटाचार्यचरणाम्बुजसंश्रितः ।
चकार रघुनाथार्यः शेषभूभृद्विभोः स्तुतिम् ॥

Colophon:

तिरुनन्ताल्वंशसंजातेन रघुनाथाचार्येण कृतं वृषाद्रिनाम(थ)स्तोत्रं संपूर्णम् ॥

No. 10364. वेङ्कटेशगद्यम्.
VĒṄKAṬĒŚAGADYAM.

Pages, 4. Lines, 7 on a page

Begins on fol. 51*a* of the MS. described under No. 5788, wherein this work has been mentioned as Śrīnivāsagadya in the list of other works given therein.

Complete.

Similar to the above. This is written in prose.

Beginning:

मरुधि(द्धि)तमरिंदमं मदनकोटिलावण्यव-
त्पुरं पुरहरार्चितं पुरुषमाद्यमानन्ददम् ।
नमामि जगदीश्वरं नलिननेत्रमब्जाननं
मम प्रियतमं हरिं मनसि वेङ्कटेशं कृती ॥

अयं किल सकलचराचरदिगन्तसन्ताननिरन्तरान्तर्बहिर्व्यापिश्रेष्ठा-खण्डब्रह्माण्डभाण्डप्रपञ्चं पञ्चशरप्रपञ्चकोटिसुषुमाविलासवशीकृतत्रिविष्टप-त्रिविष्टपेशाकिंनरकिंपुरुषसिद्धविद्याधराप्सरोयक्षरक्षोगन्धर्वगरुडपन्नगाविलासि-नीगणम् ।

End:

लोकेश्वरसाध्याधिकारवरदावनरक्षणपरं परादपि परं श्रीमद्वेङ्कटाद्रि-निकेतनं हरिं भजे ॥

No. 10365. वेङ्कटेशतूणकम्.
VĒṄKAṬĒŚATŪṆAKAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 9729, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

A hymn in praise of God Vēṅkaṭēsa written in the Tūṇaka metre.

Beginning:

वज्रशङ्ख(बाणचापचिह्नि)ताङ्घ्रिपङ्कजं
नर्तितायुतारुणाग्रनिःसरत्प्रभाकुलम् ।
वज्रपाणिमुख्यलेखवन्दितं परात्परं
सज्जनार्चितं वृषाद्रिशृङ्गसार्वभौममाश्रये ॥ २ ॥

End:

पङ्कजासनार्चितं शशाङ्कशोभिताननं
कङ्कणादिदिव्यभूषणाङ्कितं वरप्रदम् ।
कुङ्कुमाङ्कितोरसं सशङ्खचक्रनन्दकं
वेङ्कटेशमिन्दिरापदाङ्कनं भजामहे ॥ ५ ॥

No. 10366. वेङ्कटेशप्रपत्तिः.

VĒṄKAṬĒŚAPRAPATTIḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 29*b* of the MS. described under No. 9745

Complete.

Stanzas expressing self-surrender to God Vēṅkatēśa.

Beginning:

श्रीमन् कृपागुणनिधे कृतसर्वलोक सर्वज्ञ शक्त नतवत्सल सर्वशेषिन् ।
स्वामिन् सुशील सुलभाश्रितपारिजात श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥

End:

श्रीश श्रिया घटकया त्वदुपायभावे प्राप्ये त्वयि स्वयमुपेयतया स्फुरन्त्या ।
नित्याश्रिताय निरवद्यगुणाय तुभ्यं स्यां किङ्करो वृषगिरीश न जातु मह्यम् ॥

Colophon:

श्रीवेङ्कटेशप्रपत्तिः संपूर्णा ॥

No 10367. वेङ्कटेशप्रपत्तिः.

VĒṄKAṬĒŚAPRAPATTIḤ.

Pages, 3. Lines, 24 on a page.

Begins on fol. 30*a* of the MS. described under No. 5959.

Complete.

Same work as the above, but without colophon.

No. 10368. वेङ्कटेशप्रपत्तिः.

VĒṄKAṬĒŚAPRAPATTIḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 25*b* of the MS. described under No. 9754.
Contains the first eight stanzas only.
Same work as the above.

No. 10369. वेङ्कटेशप्रपत्तिः.

VĒṄKAṬĒŚAPRAPATTIḤ.

Pages, 2. Lines, 18 on a page.

Begins on fol. 30*a* of the MS. described under No. 2043.
Complete.
Same work as the above.

No. 10370. वेङ्कटेशप्रपत्तिः.

VĒṄKAṬĒŚAPRAPATTIḤ.

Pages, 2. Lines, 10 on a page.

Begins on fol. 45*b* of the MS. described under No. 9718.
Complete.
Same work as the above.

No. 10371. वेङ्कटेशमङ्गलाशंसनम्.

VĒṄKAṬĒŚAMAṄGALĀŚAMSANAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 30*a* of the MS. described under No. 9745
Complete.
Benedictory stanzas of praise addressed to God Vēṅkaṭēśa.

Beginning :

श्रियः कान्ताय कल्याणनिधये निधयेऽर्थिनाम् ।
श्रीवेङ्कटनिवासाय श्रीनिवासाय मङ्गलम् ॥

लक्ष्मीसविभ्रमालोकसभ्रूविभ्रमचक्षुषे ।
चक्षुषे सर्वलोकानां वेङ्कटेशाय मङ्गलम् ॥

End:

श्रीमत्सुन्दरजामातृमुनिमानसवासिने ।
सर्वलोकनिवासाय श्रीनिवासाय मङ्गलम् ॥

Colophon:

श्रीवेङ्कटेशमङ्गलाशंसनं संपूर्णम् ॥

No. 10372. वेङ्कटेशमङ्गलाशासनम्.
VĒṄKAṬĒŚAMAṄGALĀŚĀSANAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 31*b* of the MS. described under No. 2043.

Incomplete.

Same work as the above.

No. 10373. वेङ्कटेशमङ्गलाशासनम्.
VĒṄKAṬĒŚAMAṄGALĀŚĀSANAM.

Page, 1. Lines, 10 on a page.

Begins on fol. 46*a* of the MS. described under No. 9718.

Complete.

Same work as the above.

No. 10374. वेङ्कटेशमङ्गलाशासनम्.
VĒṄKAṬĒŚAMAṄGALĀŚĀSANAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 25*a* of the MS. described under No. 9754.

Complete.

Same work as the above.

No. 10375. वेङ्कटेशमङ्गलाशासनम्.
VĒṄKAṬĒŚAMAṄGALĀŚĀSANAM.

Pages, 2. Lines, 24 on a page.

Begins on fol. 91*a* of the MS. described under No. 5959.

Complete

Same work as the above, but with the addition of one stanza at the end as given below :—

मङ्गलाशासनपरैर्मदाचार्यपुरोगमैः ।
सर्वैश्च पूर्वैराचार्यैः सत्कृतायास्तु मङ्गलम् ॥

No. 10376. वेङ्कटेशमङ्गलाशासनम्.
VĒṄKAṬĒŚAMAṄGALĀŚĀSANAM.

Page, 1. Lines, 8 on a page.

Begins on fol. 17*b* of the MS. described under No. 9651.

Complete.

Same work as the above, but without colophon.

No. 10377. वेङ्कटेशमङ्गलाशासनम्.
VĒṄKAṬĒŚAMAṄGALĀŚĀSANAM.

Pages, 4. Lines, 7 on a page.

Begins on fol. 14*b* of the MS. described under No. 9655.

Complete.

Same work as the above, but with the addition of one stanza at the end as given under No. 10375.

No. 10378. वेङ्कटेशसुप्रभातम्.
VĒṄKAṬĒŚASUPRABHĀTAM.

Pages, 7. Lines, 24 on a page.

Begins on fol. 49*b* of the MS. described under No. 5959.

Complete.

Same work as that described under R.No. 488(*g*) of the Triennial Catalogue of MSS., Vol. I, Part I–B.

No. 10379. वेङ्कटेशसुप्रभातम्.
VĒṄKAṬĒŚASUPRABHĀTAM.

Pages, 5. Lines, 26 on a page.

Begins on fol. 8*a* of the MS. described under No. 5780.

Complete.

Same work as the above, but with an additional stanza as given below in the beginning and without colophon :—

वन्दे श्रीनयनोत्पलस्य शशिनं शेषाचलाधीश्वरं
ब्रह्माद्यर्चितपादपद्मयुगलं लोकैकनेत्रोत्सवम् ।
वासिष्ठैः सनकादिभिर्मुनिगणैः संसेव्यमानं सदा
भक्तानामभयप्रदायिनमहं श्रीवेङ्कटेशं गुरुम् ॥

No. **10380.** वेङ्कटेशसुप्रभातम्.
VEṄKAṬEŚASUPRABHĀTAM.

Pages, 9. Lines, 5 on a page.

Begins on fol. 11*a* of the MS. described under No. 9652.

Complete.

Same work as the above.

No. **10381.** वेङ्कटेशसुप्रभातम्.
VEṄKAṬEŚASUPRABHĀTAM.

Pages, 6. Lines, 5 on a page.

Begins on fol. 36*a* of the MS. described under No. 9652, and not on 37*a* as mentioned in the list of other works given therein.

Complete.

Same work as the above.

No. **10382.** वेङ्कटेशसुप्रभातम्.
VEṄKAṬEŚASUPRABHĀTAM.

Pages, 9. Lines, 6 on a page.

Begins on fol. 9*b* of the MS. described under No. 9704.

Complete.

Same work as the above, but with colophon and with the addition of one stanza in the beginning as given below :—

Beginning :

उत्तिष्ठोत्तिष्ठ गोविन्द उत्तिष्ठ गरुडध्वज ।
उत्तिष्ठ कमलाकान्त त्रैलोक्यं मङ्गलं कुरु ॥

Colophon:

वेङ्कटेशसुप्रभातं संपूर्णम् ॥

No. 10383. वेङ्कटेशसुप्रभातम्.
VEṄKAṬEŚASUPRABHĀTAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 4*a* of the MS. described under No. 9937.

Breaks off in the 14th stanza.

Same work as the above, but with the addition of an unconnected stanza in the beginning as given below:—

वेदान्तदेशिककटाक्षविवृद्धबोधं कान्तोपयन्तृयमिनः करुणैकपात्रम् ।
वत्सान्ववायमनवद्यगुणैरुपेतं भक्त्या भजामि परवादिभयंकरार्यम् ॥

No. 10384. वेङ्कटेशसुप्रभातम्.
VEṄKAṬEŚASUPRABHĀTAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 206.

Incomplete.

Same work as the above, but with the addition of the following stanza in the beginning:—

Beginning:

कौसल्यासुप्रजा राम पूर्वा सन्ध्या प्रवर्तते ।
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम् ॥

No. 10385. वेङ्कटेशसुप्रभातम्.
VEṄKAṬEŚASUPRABHĀTAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 29*a* of the MS. described under No. 9745.

Wants beginning; otherwise complete.

Same work as the above.

... INSTITUTE,
84, R. H. ROAD, MADRAS-4.

No. **10386.** वेङ्कटेससुप्रभातम्.
VĒṄKAṬĒŚASUPRABHĀTAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 42*a* of the MS. described under No. 3546.

Wants beginning and end.

Same work as the above.

No. **10387.** वेङ्कटेशसेवाक्रमः.
VĒṄKAṬĒŚASĒVĀKRAMAḤ.

Pages, 18. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 9702.

Complete.

Similar to the above.

The various acts of devotion and service, which should be observed by a pilgrim in Tirupati, are herein described by Śaṭhakōpadāsa of Gārgyagōtra and a resident of Śrīpura.

Beginning:

विद्युत्तोयदसंकाशं विश्वालिङ्गितवक्षसम् ।
विश्वरक्षासमुद्युक्तं वेङ्कटेशमहं भजे ॥
यश्चक्रे वेङ्कटेशस्य सेवाक्रममनुत्तमम् ।
तं शठारिगुरुं वन्दे गार्ग्यं श्रीपुरवासिनम् ॥
श्रीवेङ्कटाचलाधीशं श्रियाध्यासितवक्षसम् ।
श्रितचेतनमन्दारं श्रीनिवासमहं भजे ॥
प्रातरुत्थाय पूतात्मा ध्यायेयं स्वगुरोः पदे ।
श्रीवेङ्कटेशपादाब्जे यियासुर्वेङ्कटाचलम् ॥
चक्रतीर्थे ततः स्नात्वा कृत्वा पौर्वाह्निकीः क्रियाः ।
ध्यायञ्छ्रीवेङ्कटाधीशं सेवेयाञ्जनभूधरम् ॥

End:

मङ्गलं मानुषे लोके वैकुण्ठमधितिष्ठते ।
शेषशैलनिवासाय श्रीनिवासाय मङ्गलम् ॥

इत्थं श्रीवेङ्कटेशस्य सेवाक्रमपरां शुभाम् ।
गार्ग्यश्रीशठजिद्दाससूक्तिं श्रुतिसुखावहाम् ॥
प्राप्यां च प्रार्थनारूपामनुसन्दधतोऽन्वहम् ।
लभते श्रीनिवासस्य नित्यसेवामनुत्तमाम् ॥

No. **10388.** वेङ्कटेशसेवाक्रमः.
VĒṄKAṬĒŚASĒVĀKRAMAḤ.

Substance, palm-leaf. Size, 18 × 1½ inches. Pages, 12 Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete.

Same work as the above, but without the first stanza and with colophon as given below :—

श्रीनिवासस्य सेवाक्रमः समाप्तः ॥

No. **10389.** वेङ्कटेशस्तोत्रम्.
VĒṄKAṬĒŚASTŌTRAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 14*a* of the MS. described under No. 9704.

Complete.

A hymn in praise of God Vēṅkaṭēśa.

Beginning:

कमलाकुचचूचुककुङ्कुमतो नियतारुणतातुलनीलतनो ।
कमलायतलोचन लोकपते विजयी भव वेङ्कटशैलपते ॥ १ ॥
सचतुर्मुखषण्मुखपञ्चमुखप्रमुखाखिलदैवतमौलिमणे ।
शरणागतवत्सल सारनिधे परिपालय मां वृषशैलपते २ ॥

End:

अज्ञानिना मया दोषानशेषान् विहितान् हरे ।
क्षमस्व त्वं क्षमस्व त्वं शेषशैलशिखामणे ॥ ११ ॥
ईशानां जगतोऽस्य वेङ्कटपतेः (. .) भगवतीं वन्दे जगन्मातरम् ॥

No. 10390. वेङ्कटेशस्तोत्रम्.
VEṄKAṬĒŚASTŌTRAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 15*a* of the MS described under No. 9652, wherein this work has been omitted t› be mentioned in the list of other works given therein.

Complete.

Same work as the above, but with the addition of one stanza at the end as given below :—

वेङ्कटाद्रिसमं स्थान ब्रह्माण्डे नास्ति किंचन ।
वेङ्कटेशसमो देवो न भूतो न भविष्यति ॥

No. 10391. वेङ्कटेशस्तोत्रम्.
VEṄKAṬĒŚASTŌTRAM.

Pages, 3. Lines, 6 on a page.

Begins on fol 52*b* ot the MS. described under No. 5959, wherein this work has been omitted bo be mentioned in the list of other works given therein.

Complete.

Same work as the above.

No. 10392. वेङ्कटेशस्तोत्रम्.
VEṄKAṬĒŚASTŌTRAM.

Pages, 4. Lines, 19 on a page.

Begins on fol. 53*b* of the MS. described under No 5959 wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

Similar to the above.

Beginning :

श्रीवेङ्कटेशदयितां श्रेयो . . . भवतः ।
नमस्कृत्य वृषाद्रीश(च)रणौ शरणं श्रये ॥

End :

> श्रीवेङ्कटाद्रिनिलयः कमलाकामुकः पुमान् ।
> अभङ्गुरविभूतिर्मे तरङ्गयतु मङ्गलम् ॥
> कल्याणाद्भुतगात्राय कामितार्थप्रदायिने ।
> श्रीमद्वेङ्कटनाथाय श्रीनिवासाय मङ्गलम् ॥

No. 10393. वेङ्कटेशस्तोत्रम्.
VEṄKAṬĒŚASTŌTRAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 21*a* of the MS. described under No. 9078.

Complete ; as found in the Varāhapurāṇa.

Similar to the above.

This is in prose and composed in the form of a Mālāmantra.

Beginning :

ओं नमो भगवते श्रीवेङ्कटेशाय ज्ञानलोचनाय सहस्रसूर्यप्रकाशाय द्वात्रिंशत्कलापरिपूर्णाय मत्स्यकूर्मवराहावताराय ।

End :

श्रीवेङ्कटेश स्मरणेन महादुःखान्नाशय सर्वराज्ञे सेवकान् परिवारान् कुरु कुरु ।

> इत्येतत् स्तोत्रं पुण्यं सर्वदा यः पठेन्नरः ।
> सर्वतीर्थेषु यत्पुण्यं सर्वदानेषु यत्फलम् ॥
> तत्फलं समवाप्नोति भक्तिं मुक्तिं च विन्दति ।

Colophon :

इति श्रीमद्वराहपुराणे श्रीवेङ्कटेशगिरिमाहात्म्ये वेङ्कटेशक्षेत्रखण्डे सूतशौनकसंवादे श्रीवेङ्कटेशस्तोत्रं संपूर्णम् ॥

No. 10394. वेङ्कटेशस्तोत्रम्—कर्णाटकटीकासहितम्.
VEṄKAṬĒŚASTŌTRAM WITH KANARESE COMMENTARY.

Pages, 5. Lines, 5 on a page.

Begins on fol. 58*b* of the MS. described under No. 5922.

Complete.

Similar to the above, but together with a commentary in Kanarese.

Beginning and **End**:

मञ्जीरद्युतिचर्चिताङ्घ्रियुगलं व्याकोचपीताम्बरं
काञ्चीन्यञ्चितखड्गमञ्जनरुचिं कान्तिज्वलत्कुण्डलम् ।
केयूरोदरबन्धहारकमलाचक्राब्जनित्योज्ज्वलं
चारुस्मेरमुखं सरत्नमकुटं वन्दे वृषाद्रीश्वरम् ॥
हैमोर्ध्वपुण्ड्रमजहन्मकुटं सुनासं मन्दस्मितं मकरकुण्डलचारुगण्डम् ।
बिम्बाधरं बहुलदीर्घकृपाकटाक्षं श्रीवेङ्कटेशमुखमात्मनि संनिधत्ताम् ॥

No. 10395. वैकुण्ठस्तवः.
VAIKUṆṬHASTAVAḤ.

Pages, 14. Lines, 7 a page.

Begins on fol. 12*a* of the MS. described under No. 9706.

Complete.

Same work as that described under R.No. 174(*p*) of the Triennial Catalogue of MSS., Vol. I, Part I–A, but with the addition of a stanza in praise of the author in the beginning as given below :—

श्रीवत्सचिह्नमिश्रेभ्यो नमउक्तिमधीमहि ।
यदुक्तयस्त्रयीकण्ठे यान्ति मङ्गलसूत्रताम् ॥

No. 10396. वैकुण्ठस्तवः.
VAIKUṆṬHASTAVAḤ.

Pages, 13. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 9754, wherein this work has been omitted to be mentioned in the list of other works given therein.

Wants five stanzas in the beginning.

Same work as the above.

No. 10397. वैकुण्ठस्तवः.

VAIKUṆṬHASTAVAḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 33*a* of the MS. described under No. 9850.

Breaks off in the twenty-second stanza.

Same work as the above.

No. 10398. वैकुण्ठस्तवः.

VAIKUṆṬHASTAVAḤ.

Pages, 16. Lines, 7 on a page.

Begins on fol. 72*a* of the MS described under No. 9012.

Breaks off in the ninety-third stanza.

Same work as the above.

No. 10399. वैकुण्ठस्तवः—सव्याख्यः.

VAIKUṆṬHASTAVAH WITH COMMENTARY.

Pages, 8 Lines, 6 on a page.

Begins on fol. 20*a* of the MS. described under No. 5237, wherein this work has been omitted to be mentioned in the list of other works given therein.

Contains the first eleven stanzas only.

Same work as the above, but together with a commentary.

Beginning:

वेङ्कटाचार्यवर्यस्य चरणौ शरणं व्रजे ।
यदीयसेवा सर्वेषां सूते तत्त्वार्थनिर्णयम् ॥

वेदान्तवेद्यविभवं विविधावतारमादित्यवर्णमुदितं तमसः परस्तात् ।
वैकुण्ठनायकमनायकमादिमूलं पत्नीपरिच्छदविभूतियुतं नमामि ॥
यो विष्णुरेव परतत्त्वमिति प्रतिज्ञां प्रत्यर्थिसंसदि समर्थयते स्म सत्याम् ।
वेदान्तवाक्यगतिभिर्विविधैश्च तर्कैः श्रीवत्सचिह्नगुरुमेनमुपप्रयामि ॥

अथ भाष्यकारसकाशात्समधिगतपरावरतत्त्वयाथात्म्यज्ञानः श्रीवत्साङ्कमिश्रो वेदान्तैकसमधिगम्यपत्नीपरिच्छदसमेतं परमप्राप्यं नित्यमुक्तभोग्यं

श्रीवैकुण्ठनाथं वेदान्तवाक्यार्थानुसन्धानक्रमेण सकलजगदुज्जीवनार्थं स्वो- ज्जीवनार्थं च स्तोतुकामः प्रथमं स्वाचार्यं प्रबन्धादौ प्रणमति—

> यो नित्यमच्युतपदाम्बुजयुग्मरुक्म-
> व्यामोहतस्तदितराणि तृणाय मेने ।
> अस्मद्गुरोर्भगवतोऽस्य दयैकसिन्धोः
> रामानुजस्य चरणौ शरणं प्रपद्ये ॥ १ ॥

पादाम्बुजयुग्ममेव रुक्मम्; भोग्यमिति यावत् । तत्र व्यामोहात् तद्व्यतिरिक्तकृत्स्नपुरुषार्थान् तृणाय मेने तृणवदमंस्त ।

End:

इदानीं प्रमाणप्राप्तिः प्रमेयप्राप्तिश्च सुकृतिनामेव, नेतरेषामित्याह—

> अन्तर्हितो निधिरसि त्वमशेषपुंसां लभ्योऽसि पुण्यपुरुषैरितरैर्दुरापः ।
> तत्र त्रये(यीं) सुकृतिनः कृतिनोऽधिजग्मुर्बाह्येषु बाह्यचरितैरितरैर्निपेते ॥

त्वं सर्वेषां तिरोहितो निधिरसि । दुरापः दुष्प्रापः । तत्र निधि- विषये । कृतिनः विद्वांसः । इतरैरसुकृतिभिः वेदबाह्यचरितैः वेदबाह्येषु षड्दर्शनेषु निपेते पतितम्; भावे लिट् ॥ ११ ॥

No. 10400. वैराग्यपञ्चकम्.
VAIRĀGYAPAÑCAKAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 20*a* of the MS. described under No. 10145.

Complete.

Five stanzas by Vēdāntadēśika, showing his utter contempt of the service rendered to kings for advancing one's wordly welfare and stating that his heap of wealth consists in his service and devotion to God alone. These stanzas are considered to have been composed and sent to Vidyāraṇya by Vēdāntadēśika, when the former invited the latter to come to the court of Vijayanagaram and share the king's patronage.

Beginning:

क्षोणीकोणशतांशपालनकलादुर्वारगर्वानल-
क्षुभ्यत्क्षुद्रनरेन्द्रचाटुरचनाधन्यान्न मन्यामहे ।
देवं सेवितुमेव निश्चिनुमहे योऽसौ दयालुः पुरा
धानामुष्टिमुचे कुचेलमुनये दत्ते स्म वित्तेशताम् ॥ १ ॥

End:

शरीरपतनावधि प्रभुनिषेवणापादना-
दबिन्धनधनञ्जयप्रशमदं धनं दन्धनम् ।
धनञ्जयविवर्धनं धनमुदूढगोवर्धनं
सुसाधनमबाधनं सुमनसां समाराधनम् ॥ ५ ॥
नास्ति पित्रार्जितं किंचिन्न मया किंचिदार्जितम् ।
अस्ति मे हस्तिशैलाग्रे वस्तु पैतामहं धनम् ॥ ६ ॥

No. 10401. शरणागतिदीपिका.

ŚARANĀGATIDĪPIKĀ.

Pages, 17. Lines, 5 on a page.

Begins on fol. 75*a* of the MS. described under No. 9388
Complete.

Stanzas in praise of and showing his self-surrender to God Dīpaprakāśa, worshipped in Conjeeveram: by Vēdāntadēśika.

Beginning:

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥

पद्मापतेः स्तुतिपदेन विपच्यमानं पश्यन्त्विह प्रपदनप्रवणा महान्तः ।
मद्वाक्यसंवलितमप्यजहत्स्वभावं मान्यं यतीश्वरमहानससंप्रदायम् ॥
नित्यं श्रिया वसुधया च निषेव्यमाणमव्याजनिर्भरदयाभरितं विभाति ।
वेदान्तवेद्यमिह वेगवतीसमीपे दीपप्रकाश इति दैवतमद्वितीयम् ॥

End:

स्नेहोपपन्नविषयः स्वदशाविशेषाद्भूयस्तमिस्रशमनीं भुवि वेङ्कटेशः ।
दिव्यां स्तुतिं निरमिमीत सतां नियोगाद्दीपप्रकाशशरणागतिदीपिकाख्याम् ॥

एनां दीपप्रकाशस्तुतिमिह रुचिरामित्थमभ्यस्यमानः
सम्यग्दृष्ट्वा शरण्यप्रभृतिनिगदितन्यासविद्याख्यतत्त्वम् ।
प्रत्यासीदद्विमुक्तानुभवफलसमुद्भेदलक्ष्या(ब्ध्या)कृतार्थः
प्राप्ते पिण्डस्य भेदे परिणमति परब्रह्मसब्रह्मचारी ॥

Colophon:

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु दीपप्रकाशशरणागतिदीपिका संपूर्णा ॥

No. 10402. शरणागतिदीपिका.

ŚARAṆĀGATIDĪPIKĀ

Pages, 13. Lines, 5 on a page

Begins on fol. 32*a* of the MS described under No. 8904.

Complete.

Same work as the above.

No. 10403. शरणागतिदीपिका.

ŚARAṆĀGATIDĪPIKĀ.

Pages, 9. Lines, 8 on a page.

Begins on fol. 95*a* of the MS. described under No 9706

Complete.

Same work as the above.

No 10404. शरणागतिदीपिका.

ŚARAṆĀGATIDĪPIKĀ

Pages, 11. Lines, 6 on a page

Begins on fol. 17*a* of the MS. described under No. 2422.

Complete.

Same work as the above, but without colophon, and with the addition of one stanza at the end as given below :—

कवितार्किकसिंहाय (. . .) वेदान्तगुरवे नमः ॥

No. 10405. शरणागतिदीपिका.

ŚARAṆĀGATIDĪPIKĀ.

Pages, 14. Lines, 5 on a page.

Begins on fol. 24*a* of the MS. described under No. 5777.

Complete.

Same work as the above.

No. 10406. शरणागतिदीपिका.

ŚARAṆĀGATIDĪPIKĀ.

Pages, 6. Lines, 8 on a page.

Begins on fol 19*a* of the MS described under No. 3546.

Complete.

Same work as the above, but with colophon.

No. 10407. शरणागतिदीपिका.

ŚARAṆĀGATIDĪPIKĀ.

Pages, 7. Lines, 8 on a page.

Begins on fol. 168*a* of the MS. described under No. 9001.

Complete.

Same work as the above

No. 10408. शरणागतिदीपिका.

ŚARAṆĀGATIDĪPIKĀ.

Pages, 7. Lines, 11 on a page.

Begins on fol 17*b* of the MS. described under No. 3550.

Complete.

Same work as the above.

No. 10409. शरणागतिदीपिका—सव्याख्या.

ŚARAṆĀGATIDĪPIKĀ WITH COMMENTARY.

Substance, palm-leaf. Size, 16½ × 1⅝ inches. Pages, 109. Lines, 5 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Complete.

Same work as the above, but together with a commentary by Gārgya Vēṅkaṭārya, a disciple of Dayēśārya of Śrī-Vatsagōtra.

Beginning:

काञ्चीदीपप्रकाशस्य कवितार्किककेसरी ।
चक्रे नुतिं महत्तुष्ट्यै शरणागतिदीपिकाम् ॥

* • * *

गार्ग्यश्रीवेङ्कटार्येण व्याख्या तस्या वितन्यते ॥

आदौ स्तोता अर्थतः शब्दतश्च मङ्गलमाचरति द्वाभ्याम् । तत्र प्रथमेन श्लोकेन चिकीर्षित(प्रतिज्ञा)पूर्वकमात्मसमाधानं कुर्वन् प्रबन्धस्य विषयप्रयोजने च दर्शयन् तदधिकारिणोऽनुशास्ते(स्ति)—पद्मापतेरिति ।

पद्मापतेः स्तुतिपदेन विपच्यमानं (. . .) मान्यं यतीश्वरमहानस-संप्रदायम् ॥

पद्मापतेः स्तुतिपदेन स्तोत्रव्याजेन विपच्यमानं स्तोत्ररूपेण परिणत-मित्यर्थः । मद्वाक्यसंवलितमपि अज्ञस्याशक्तस्यापवित्रस्य प्रेमविधुरस्य मम वचनबद्धमपि अजहत्स्वभावं स्वभावमपरित्यजन्तम्; स्वभाव इह प्रामाणि-कता प्रपन्नजनपरिग्राह्यता च ।

End:

भेदे विश्लेषे प्राप्ते सति परब्रह्मसब्रह्मचारी परिणमति परस्य ब्रह्मणः सब्रह्मचारी समानभोग इत्यर्थः, 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति' इति श्रुतेः । स्तोत्रपठनमात्रेण सम्यग्ज्ञानी भूत्वा विमुक्तो भवतीति भावः ॥

Colophon :

व्याख्यद्वात्स्यदयेशार्यदयासंचोदितः सुधीः ।
गार्ग्यश्रीवेङ्कटाचार्यः शरणागतिदीपिकाम् ॥

The name of the scribe and the date of the completion of the copy are thus given :—

विजयकुम्भकृष्णा(ष्ट)म्यां सानूराधभानुवारे कौण्डिन्यसुन्दरदासेन श्रीभूतपुरीनिवासिना शरणागतिदीपिकाव्याख्या व्यलिख्यत ॥

No. 10410. शरणाष्टकम्.

ŚARAṆĀṢṬAKAM.

Pages, 2. Lines, 26 on a page.

Begins on fol. 87*b* of the MS. described under No. 2981

Complete.

Eight stanzas showing the supplicant's self-surrender to Lord Krsna : by Haridāsa.

Beginning :

स्वामिनीचिन्तया चित्तखेदस्विन्नमुखाम्बुजः ।
नमन्नयनयुग्मो यः स कृष्णः शरणं मम ॥ २ ॥

End :

रसात्मा रसभावज्ञो रसलीलापरायणः ।
रसात्मगोपीरसिकः स कृष्णः शरणं मम ॥ ८ ॥

Colophon :

इति श्रीहरिदासविराचितं शरणाष्टकं संपूर्णम् ॥

No. 10411. शार्ङ्गपाणिस्तोत्रम्.

ŚĀRṄGAPĀṆISTŌTRAM.

Substance, paper. Size, $13\frac{1}{4} \times 8\frac{3}{8}$ inches. Pages, 5. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 100*a*. The other work herein is Nikṣēpacintāmaṇi 1*a*.

Complete.

In praise of God Visnu worshipped under the name of Śārṅgapāṇi (lit. having in his hand a bow named Śarṅga) in the sacred shrine at Kumbakonam: by Gōpāladēśika, a disciple of Kṛṣṇasūri and author of Vaiśvadēvāgninirṇaya and Vēdāntadēśikasahasranāman.

Beginning:

श्रीकुम्भघोणपतिशार्ङ्गिनुतेश्च वैश्वदेवाग्निनिर्णयत आगममौलिसूरेः ।
नाम्नां सहस्रत इतः कृतदासभाग्यं गोपालदेशिकमहं शरणं प्रपद्ये ॥१॥

सत्यं ज्योतिः श्रुतिपरिषदामप्रमेयं प्रमेयं
कल्याणानामविकलगृहं पावनं पावनानाम् ।
आविर्भूतं कनकसरितो दक्षिणे तीरभागे
शार्ङ्गशाख्यं विनतशरणं भातु चित्ते सदा मे ॥ २ ॥

End:

श्रीमद्वैदिकसंज्ञके दिविषदां मान्ये विमाने सति
श्रीमच्छार्ङ्गधरस्य संस्तुतिरियं गोपालसूर्यर्पिता ।
भक्तिं यच्छति शार्ङ्गिणि प्रसृमरां कैङ्कर्यसिद्धिं तदा
नित्यं संपठतामरोगसुखितापूर्वं च सन्मङ्गलम् ॥ २४ ॥

Colophon:

इति श्रीकृष्णसूरिपादारविन्दचञ्चरीकस्य गोपालदेशिकस्य कृतिषु शार्ङ्गिस्तुतिः संपूर्णा ॥

No. 10412. श्रीनाथाष्टकम्.

ŚRĪNĀTHĀṢṬAKAM.

Pages, 2. Lines, 26 on a page.

Begins on fol. 71b of the MS. described under No. 2981.

Complete.

Eight stanzas extolling Kṛṣṇa, the Lord of Lakṣmī, in connection with the lifting up of the Gōvardhana mountain: by Viṭṭhalācārya.

Beginning:

दिव्यकेलिकतुकामवेषगोपबालकं नृत्यगीतहासहर्षधेनुवत्सपालकम् ।
स्वीयमित्रमोहहेतुभक्तपक्षपालकं श्रीगिरीन्द्रधारिणं व्रजेन्द्रसूनुमाश्रये १॥

End:

सूर्यपुत्रिपुण्यतीररासरत्नरागिणं पाक्षिराजमुक्तनागचारुवस्तुभागिनम् ।
विट्ठलेशविप्ररूपमोक्षकामयोगिनं श्रीगिरीन्द्रधारिणं व्रजेन्द्रसूनुमाश्रये ॥८॥

Colophon:

इति श्रीमदाचार्यविरचितं श्रीनाथाष्टकं संपूर्णम् ॥

No. 10413. श्रीमदष्टकम्.
ŚRĪMADAṢṬAKAM.

Pages, 2. Lines, 26 on a page.

Begins on fol. 75*a* of the MS. described under No. 2981.

Complete.

Similar to the above. By Haridāsa.

Beginning:

निकुञ्जे भञ्जद्द्रूविविधमृदुपुष्पैकनिचयैः
समाकीर्णे जातं सुमणिजडितं केलिशयनम् ।
हृदि प्रादुर्भूतोद्भटविरहभावैः सह हरिं
करे कृत्वा राधां व्यजनमविशन्तीं हृदि भजे ॥ १ ॥

End:

न मे वाञ्छ्यो मोक्षः श्रुतिषु चतुरात्मा निगदितो
न शास्त्रीया भक्तिर्न पुनरिह विज्ञानमपि मे ।
कदाचिन्मां स्वामिन्यहह मयि दासे कृपयतु
स्वतः स्वाचार्याणां चरणशरणे दीनकरुणा ॥ ८ ॥

Colophon:

इति श्रीहरिदासोदितं श्रीमदष्टकं संपूर्णम् ॥

No. 10414. संपत्कुमारप्रपात्तिः.
SAMPATKUMĀRAPRAPATTIḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 6*a* of the MS. described under No. 9655

Complete.

Stanzas showing the supplicant's self-surrender to God Sampatkumāra, worshipped in the sacred temple at Mēlkōṭa.

Beginning:

श्रीमन् यदुक्षितिधरेश विधीशवन्द्य नारायण प्रणतवत्सल रम्यशील ।
स्वामिन् यतीन्द्रवरनाथनसौम्यमूर्ते संपत्कुमार चरणौ शरणं प्रपद्ये ॥

End:

सत्त्वोत्तरैर्जनिपयोनिधिकर्णधारैर्मद्दैवतैर्मधुरिपोश्चरमावतारैः ।
श्रीमद्भिरार्यचरणैः परिसेवितस्य नारायणस्य चरणौ शरणं प्रपद्ये ॥

No. 10415. संपत्कुमारप्रपत्तिः.
SAMPATKUMĀRAPRAPATTIḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol 8b of the MS. described under No. 9655.
Complete.
Similar to the above.

Beginning:

श्रीमन् यदुक्षितिधरेश कृपाम्बुराशे श्रीलक्ष्मणार्यत(न)याश्रित सज्जनानाम ।
संसारघोरतिमिरार्क तवाभिरामौ संपत्कुमार चरणौ शरणं प्रपद्ये ॥

End:

रामानुजार्यपदपद्मपरायणैर्द्विपञ्चाशदाख्याविबुधैर्गुरुभिश्चतुर्भिः ।
संपूजितौ सकललोकनमस्कृतौ ते संपत्कुमार चरणौ शरणं प्रपद्ये ॥

No. 10416. संपत्कुमारमङ्गलाशासनम्.
SAMPATKUMĀRAMAṄGALĀŚĀSANAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 10*a* of the MS. described under No. 9655
Complete.
Stanzas pronouncing benediction on God Sampatkumāra

Beginning:

श्रीशाय सर्वजगतां शेषिणे रक्षकाय च ।
यतीन्द्रसूनवे संपत्कुमाराय(यास्तु) मङ्गलम् ॥

End:

इतं(त्थं) संपत्कुमारस्य मङ्गलाशासनस्तुतिम् ।
यः पठेन्नित्यतो भक्त्या मुक्तिस्तस्य वशा सदा ॥

Colophon:

इति संपत्कुमारमङ्गलाशासनं संपूर्णम् ॥

No 10417. सालग्रामस्तोत्रम्.
SĀLAGRĀMASTŌTRAM.

Pages, 4. Lines, 6 on a page.

Begins on fol 37*a* of the MS. described under No. 115.

Complete.

In praise of Sālagrāma stones, which are considered by Hindus as representing God Viṣṇu. The place where these stones are available is referred to in a stanza which is given in the extract.

Beginning:

अस्य श्रीसालग्रामस्तोत्रमन्त्रस्य श्रीकृष्ण ऋषिः, विष्णुर्देवता, त्रिष्टुप् छन्दः । भुक्तिमुक्तिप्रदायकं सर्वपापक्षयार्थे श्रीसालग्रामस्तोत्रमहं करिष्ये ।

गण्डक्या उत्तरे तीरे गिरिराजस्य दक्षिणे ।
दशयोजनविस्तीर्णे मम क्षेत्रवसुन्धरा ॥

प्रह्लाद उवाच—

सालग्रामभवो देवो देवो द्वारवतीभवः ।
उभयोः सङ्गमो यत्र मुक्तिस्तत्र न संशयः ॥
जन्मप्रभृति पापानां प्रायश्चित्तं यदीप्ससि ।
सालग्रामशिलावारि पापहारि निषेव्यताम् ॥

End:

दामोदरश्च देवस्तु मध्येचक्रं प्रतिष्ठितः ।

* * *

स्नानकाले पठेन्नित्यं पूजाकाले तथैव च ।
सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥

No 10418. सीतारामस्तोत्रम्.
SĪTĀRĀMASTŌTRAM.

Page, 1. Lines, 8 on a page.

Begins on fol. 20*a* of the MS. described under No. 9729.

Complete.

A hymn in praise of Rāma and Sītā who are held to be the incarnations of God Visnu and Goddess Lakṣmī. It is attributed to Hanūmat; and its due repetition as well as hearing is considered to be efficacious in the accomplishment of one's desires.

Beginning:

अयोध्यापुरनेतारं मिथिलापुरि(र)नायिकाम् ।
राघवाणामलंकारं वैदेहानामलंक्रियाम् ॥

End:

इति श्रीरामचन्द्रस्य जानक्याश्च विशेषतः ॥
कृतं हनुमता पुण्यं स्तोत्रं सर्वार्थसिद्धिदम् ।
यः पठेच्छृणुयाद्वापि सर्वकामानवाप्नुयात् ॥

Colophon:

इति श्रीसीतारामचन्द्रस्तोत्रं संपूर्णम् ॥

No. 10419. सुगमध्यानसोपानम्.
SUGAMADHYĀNASŌPĀNAM.

Pages, 4. Lines, 8 on a page.

Begins on fol. 245*a* of the MS. described under No. 9001.

Complete.

This work is in praise of God Śrīnivāsa as worshipped in the sacred hills at Tiruppati: by Śaṭhakōpadāsa, a disciple of Samarapuṅgavadīksita.

Beginning:

पुच्छे कृत्वा गिरीशं सह विबुधगणैरन्तरङ्गे नृसिंहं
लक्ष्म्या सार्धं दधानः स्फुरति मणिफणामण्डले दीप्यमाने ।
बिभ्राणं श्रीनिवासं सकलदिविषदां दर्शयन्ब्रह्मतत्त्वं
शेषः श्रीशैलवेषं(षो) जगति विजयते सर्वसत्त्वोपजीवी ॥ १ ॥

End:

इत्यारोढुं महोच्चैःपदममृतमयं श्रीनिवासस्य विष्णोः
श्रीपादाद्याकिरीटावयवपरिलसद्रत्नभङ्गी मनोज्ञा ।
श्रीसंयत्पुङ्गवाङ्घ्रिप्रवणवकुलभृद्योगिवा(दा)सेन क्लृप्ता
संभव्या सात्त्विकानां भवति च सुगमा ध्यानसोपानपङ्क्तिः ॥ १४॥

Colophon:

इति सुगमध्यानसोपानपङ्क्तिः ॥

No. 10420. सुन्दरबाहुस्तवः.
SUNDARABĀHUSTAVAḤ.

Pages, 14. Lines, 10 on a page.

Begins on fol. *6a* of the MS. described under No. 10265.

Complete.

Same work as that described under R.No. 174(*o*) of the Triennial Catalogue of MSS., Vol. I, Part I-A.

No. 10421. सुन्दरबाहुस्तवः.
SUNDARABĀHUSTAVAḤ.

Pages, 19. Lines, 7 on a page.

Begins on fol. *3a* of the MS. described under No. 9706.

Complete.

Same work as the above, but with the addition of one extra stanza in the beginning and at the end as given below :—

श्रीवत्सचिह्नमिश्रेभ्यो (. . .) मङ्गलसूत्रताम् ॥

No. 10422. सुन्दरबाहुस्तवः.
SUNDARABĀHUSTAVAḤ.

Pages, 18. Lines, 6 on a page.

Begins on fol 63*a* of the MS. described under No 9012.

Complete.

Same work as the above, but with the addition of one more stanza at the end as given below: –

कूराधिनाथचरणौ तादृशनतजातपोषणे निपुणौ ।
शिरसा नमामि नित्यं नास्त्येव ततः कदापि मे कृत्यम् ॥

No. 10423. सुन्दरबाहुस्तवः.
SUNDARABĀHUSTAVAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 23*a* of the MS. described under No. 5777.

Breaks off in the eighth stanza.

Same work as the above.

No. 10424. सुन्दरबाहुस्तवः.
SUNDARABĀHUSTAVAḤ.

Pages, 6. Lines, 8 on a page.

Begins on fol. 6*a* of the MS. described under No. 9825.

Breaks off in the sixty-eighth stanza.

Same work as the above.

No. 10425. सुन्दरबाहुस्तवः—सव्याख्यः.
SUNDARABĀHUSTAVAḤ WITH COMMENTARY.

Pages, 56. Lines, 8 on a page.

Begins on fol. 9*a* of the MS. described under No. 9825.

Complete.

Same poem as the above, but together with a commentary by Rāmānujācārya, a disciple of Vēnkaṭācārya.

Beginning:

अथ भगवद्भाष्यकारसकाशाल्लब्धपरावरतत्त्वयाथात्म्यावबोधः श्रीवत्साङ्कमिश्रः कावेरीमध्यगताच्छ्रीरङ्गक्षेत्राद्दक्षिणस्यां दिशि वरगिरिवृषगिरिसिंहगिरिप्रभृतिनामभिः प्रसिद्धे महापर्वते कृतावतारं सुन्दरबाहुसुन्दरालंकारादिनामभिर्व्यवह्रियमाणं दिव्यप्रबन्धप्रसिद्धवैभवं महाविष्णुं स्वोज्जीवनार्थं सकलप्राणिहितार्थं च स्तोतुकामः प्रथमं स्तोत्रारम्भं प्रतिजानाति—

श्रीमन्तौ हरिचरणौ समाश्रितोऽहं

* * * *

स्तोष्ये तच्चरणविलोकनाभिलाषी ॥

यतः कारणाद्भगवत्पादसमाश्रितः रामानुजमुनीन्द्रसकाशाल्लब्धबोधश्च ततः कारणान्निर्भयः सन् तच्चरणसाक्षात्काराभिलाषी सुन्दरोरुबाहुनामानं विष्णुं स्तोष्ये इत्यन्वयः । हरिचरणौ समाश्रित इत्यनेन प्रबन्धादौ कर्तव्या नमस्क्रिया कृतेत्यनुसन्धेयम् ।

End:

प्रार्थितमेव पुनः प्रार्थयन् स्तोत्रशेषं परिसमापयति—इदमिति । पुनः पुनः विज्ञीप्सामि विज्ञापयितुमिच्छामीति हेतोरगतिरनन्यशरणः कृतपापो दुष्टमनाः कलुषबुद्धिरस्मीति च हेतोस्ते दयायाः पात्रमिति सर्वं समञ्जसम् ॥

Colophon:

इति रामानुजाचार्यविरचिता सुन्दरबाहुस्तोत्रव्याख्या संपूर्णा ॥

वेङ्कटाचार्यशिष्येण रामानुजविपश्चिता ।
सुन्दरेशस्तुतिव्याख्या यथामति विनिर्मिता ॥

No **10426.** सुन्दरबाहुस्तवः—सव्याख्यः.

SUNDARABĀHUSTAVAḤ WITH COMMENTARY.

Pages, 54. Lines, 8 on a page.

Begins on fol. 6*a* of the MS. described under No. 9850.

Almost complete.
Same work as the above.

No **10427.** सुन्दरबाहुस्तवः---सव्याख्यः.

SUNDARABĀHUSTAVAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, $15\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 108. Lines, on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Varadarājastava-vyākhyā 54*b*.

Complete.

Similar to the above.

Beginning:

अथ भगवद्भाष्यकारपरमकृपालब्धपरावरतत्त्वयाथात्म्याः तदीयपादारविन्दद्वन्द्वसेवैकधारकाः श्रीवत्साङ्कमिश्राः पाषण्डप्रभुविवासिततद्विश्लेषमसहमानतया विभवावतारस्तवादर्चावतारस्तुतेः प्रशस्तत्वाच्च समाश्रितजनसर्वाभीष्टप्रदवन(र)गिरिमन्दिरसुन्दरबाहुमहिमस्तवप्रवृत्ताः प्रस्ताव एव भाष्यकारचरणनलिनविलोकनत्वे फलत्वेन संकल्प्य सकलश्रुत्यन्ततत्त्वार्थराशिं प्रकाशयितुं प्रारभन्ते—

श्रीमन्तौ हरिचरणौ समाश्रितोऽहं

* * * *

स्तोष्ये तच्चरणविलोकनाभिलाषी ॥

श्रीरामावरजमुनीन्द्रलब्धबोधः श्रीरामानुजयोगीन्द्रसंप्राप्तत्रय्यन्तज्ञानः अत एव श्रीमन्तौ हरिचरणौ समाश्रितः ।

End:

ततः प्रियतरगुरुचरणविरहविषण्णोऽहं परदुःखासहिष्णुतारूपायाः केवलकृपायाः पात्रमिति मत्वा विज्ञापितं निर्वर्तयेति भावः ॥

Colophon:

श्रीसुन्दरबाहुस्तवः समाप्तः । श्रीसुन्दरबाहुस्तवव्याख्या परिसमाप्ता ॥

No. 10428. स्तवनायकः.
STAVANĀYAKAḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 81*b* of the MS. described under No. 9001.

Complete; as found in the sixteenth Adhyāya of the Mārkaṇḍēyapurāṇa.

A hymn of praise said to have been addressed to God Viṣṇu by Śiva in order to free himself from the sin caused by his beheading one of the heads of Brahman, as a result of which sin the skull of Brahman's head began to stick to Śiva's hand.

Beginning:

वेदव्यासः—

श्रीकण्ठः परमेशानः सर्वदेवनमस्कृतः ।
ब्रह्महत्याभिभूतः सन्नुत्तमाङ्गकपालभृत् ॥
शापमोक्षोत्सु(क)मजं (ना)भिक्षाटनवपुर्धरः ।

* * * *

ततः कपालमोक्षार्थी क्षीराब्धेस्तटमुत्तमम् ।
समासाद्य नमः कृत्वा दक्षिणाभिमुखः स्वयम् ॥
तुष्टाव देवदेवेशं जगत्कारणमच्युतम् ।

महादेवः—

प्रसीद देवदेवेश प्रसीद गरुडध्वज ।
प्रसीद विष्णो लक्ष्मीश प्रसीद पुरुषोत्तम ॥

End:

स्तवनायकमेतद्धि त्रिसन्ध्यं यः पठेन्नरः ।
सर्वान् लोकानतीत्यैव विष्णुलोकं स गच्छति ॥

* * * *

सर्वपापविशुद्धात्मा स याति परमां गतिम् ॥

Colophon:

इति मार्कण्डेयपुराणे स्तवनायको नाम षोडशोऽध्यायः ॥

No. 10429. स्तोत्ररत्नम्.
STŌTRARATNAM.

Pages, 12. Lines, 24 on a page.

Begins on fol. 20*a* of the MS. described under No. 5959.

Complete.

Same work as that described under R. Nos. 160(*t*) and 173(*g*) of the Triennial Catalogue of MSS., Vol. I, Part I-A. This is also called Āḻavandārstōtra from the fact that the author, Yāmunācārya, is also known by the Tamil name of Āḻavandār.

No. 10430. स्तोत्ररत्नम्.
STŌTRARATNAM.

Pages, 16. Lines, 16 on a page.

Begins on fol. 45*a* of the MS. described under No. 497.

Complete.

Same work as the above.

No. 10431. स्तोत्ररत्नम्.
STŌTRARATNAM.

Pages, 5. Lines, 7 on a page.

Begins on fol. 127*a* of the MS. described under No. 2079.

Complete.

Same work as the above.

No. 10432. स्तोत्ररत्नम्.
STŌTRARATNAM.

Pages, 7. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 9534

Complete.

Same work as the above.

No. 10433. स्तोत्ररत्नम्.

STŌTRARATNAM.

Pages, 5. Lines, 6 on a page.

Begins on fol. 8*a* of the MS. described under No. 9008

Complete.

Same work as the above

No. 10434. स्तोत्ररत्नम्.

STŌTRARATNAM.

Pages, 13. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 9672.

Complete.

Same work as the above.

No 10435. स्तोत्ररत्नम्.

STŌTRARATNAM.

Pages, 8. Lines, 8 on a page.

Begins on fol. 80*b* of the MS described under No 9610.

Wants beginning ; otherwise complete.

Same work as the above, but with colophon :

स्तुतिरेषा परिसमाप्ता ॥

No. 10436. स्तोत्ररत्नम्.

STŌTRARATNAM.

Pages, 14. Lines, 16 on a page.

Begins on fol. 2*a* of the MS. described under No. 2380.

Complete

Same work as the above.

No. 10437. स्तोत्ररत्नम्.

STŌTRARATNAM.

Pages, 2. Lines, 9 on a page.

Begins on fol. 45*a* of the MS. described under No. 9012.

Complete.

Same work as the above, but with colophon as given below :—

यामुनार्यविरचितस्तोत्रं सपूर्णम् ॥

No. 10438. स्तोत्ररत्नम्.

STŌTRARATNAM

Pages, 31. Lines, 4 on a page.

Begins on fol. 45*a* of the MS. described under No. 9675.

Wants the first stanza; otherwise complete.

Same work as the above.

No 10439. स्तोत्ररत्नम्.

STŌTRARATNAM.

Pages, 8. Lines, 9 on a page.

Begins on fol. 5*a* of the MS. described under No. 9922.

Complete.

Same work as the above, but the last stanza is written in the beginning as well as at the end.

No. 10440. स्तोत्ररत्नम्.

STŌTRARATNAM.

Pages, 7. Lines, 15 on a page.

